१

श्रीगणेशाय नमः ॥ स जयति विश्वशरीरो विश्वातीतश्चिदेकरसमात्रः ॥ मानातीतो द्वैतो द्वैतत्वाभासविषया विदुषां ॥ भट्टोपाभिध
नीलकंठविदुषां श्रीमद्गुरूणां पदं संचिंत्याधिहृदं भामाश्रयजुषां विष्णुः करिष्णुः प्रियं ॥ ध्वांतोद्भूतविरुद्धकल्पनपरीहारे कृव
धादरांस आख्यांतरसंग्रहैः स्फुटलिखितां प्रथयाति चिच्चंद्रिकां ॥ प्रारीप्सितनिबंधस्य निर्विघ्नतया परिसमाप्तये प्रकृतशास्त्र
मूलभूतचतुर्दशसूत्रोपदेष्टृत्वेन मुख्यतया सांबसदाशिवं नमस्यन् मंगलमाचरन् शिष्यशिक्षायै निबंध्य चिकीर्षितं प्र
तिजानीते ॥ न त्वेति ॥ नागेशइति ॥ आत्मनामेति षेधः नामविशेषविशेषयेरिति केचित् ॥ उच्चारणे एव निषेधो न तु लेखने इ
त्यन्ये ॥ स्फुटं अनायासः आयासेन भाष्यादितोपि बोधसंभवात् ॥ प्राचीनेति ॥ आपिशलादितंत्रस्थपरिभाषाकांडेरस
र्थे ॥ वाचनिकानि सूत्ररूपेण पठितानि । ज्ञापके यस्य प्रायेण सादिः । तेन वाचनिकानामपि संग्रहः ॥ सूत्रपाठस्थपरिभा
षाणामव्याख्यानेपि न क्षतिरिति च सूचितं ॥ प्राचीनोक्तानां केषांचिदप्रामाण्यान्याह ॥ भाष्येति ॥ अनेन रूढ्यर्थता
वच्छेदक [illegible] समुक्तं ॥ [illegible]नेज्ञापकन्यायसिद्धानीति टपकू कोटिः ॥ अनेन परिभाषासूत्रमुदास इति तु चिंत्यं ॥ प्राचीनतंत्रेरक्रो गु
णेसादिपरिभाषासूत्रसद्भावे मानाभावात् ॥ सत्त्वे वा टपकू कोटिस्वीकारेपि दोषस्य दुर्वारत्वात् ॥ भाष्यवार्तिकोपनिबद्धत्वं च
भाष्यवार्तिकावगतत्वं । तेन तद्ध्वनितानामपि संग्रहः ॥ परिभाषेति ॥ परितो व्यापृतां भाषां परिभाषां प्रचक्षते इत्यभियु
क्तोक्तिः ॥ लिंगवत्त्वे इति फलवत्त्वं परिभाषात्वमिति केचित् । यत्तु संज्ञाशास्त्रान्यत्वे सति विध्यपेक्षितार्थप्रतिविधायकत्वं त

त्वं॥संज्ञा च परिभाषा चेत्यभियुक्तोक्तेः अतिदेशस्यापृथगुपादानं गोबलीवर्दन्यायेनेति तन्न॥अनुदात्तं पदमेकवर्जं वर्णाश्रयेनास्ति प्र

त्ययलक्षणं इति विधिनिषेधरूपपरिभाषाणामसंग्रहापत्तेः॥आख्यायन्ते इति॥उदाहरणं तापकादिमदर्शनेन विशेषं

तेत्यर्थः॥तत्रैतच्छास्त्रमूलभूतचतुर्दशसूत्रांतर्गततात्पर्यसिद्धत्वात् सिद्धेशब्दार्थसंबंधे इत्यत्र भाष्यकृद्भिः प्रथममाश्रितत्वात् सर्वोपयोगित्वाच्च व्याख्यानत इति परिभाषायाः प्रथमतो व्याख्यानं युक्तमित्याह॥नन्विति॥अन्यतरार्थरूपस्येति।

इदमुपलक्षणं संदिग्धत्वे विरहेपि व्याख्यानांगीकारस्यावश्यकत्वात्॥यथा गोभाध्वस्त्रियामित्यत्र यूनि मध्यमः स्त्रियां तु ने

त्यर्थस्य संदिग्धत्वेपि व्याख्यानात् स्त्रियां तु न युवसंज्ञेत्यर्थस्यैवांगीकारः॥शास्त्रमित्यध्याहारलभ्यं॥अननुष्ठापकेति॥प्रमाणा

र्थकलक्षणशब्देनात्र शास्त्रार्थकेन नञ्समासः॥अप्रोशास्त्रस्य च अनुष्ठानप्रतिबंधकसंदेहविषयार्थबोधकत्वेनेति शास्त्र

स्याननुष्ठापकत्वं फलतीति भावः॥अनुष्ठानं शब्दप्रयोगरूपं॥संदिग्धोच्चारणेति॥वं संदिग्धार्थपरसंदिग्धपदे अत्रोआथ

च॥व्याख्यानातिरिक्तेति॥प्रतिपत्तिलाघवाय अनुबंधांतरे उच्चारणीये संदिग्धोच्चारणेन व्याख्यानत एव संदेहनिवृत्तिः

न स्वकल्पितप्रयत्नेन कार्येति बोध्यते॥तथा चान्यत्रैवात्र भगवतो तापकतानाभिप्रेता तेन स्वस्मिन्नुच्चारिताद्योभावेपि न

दोषः॥पूर्वेणाण्ग्रहणमिति॥इत्थं पोउरपूर्वेणअणोपगत्वर्णस्येते षितिबोध्यं॥तत्र शास्त्रेषु॥यद्वा तत्र। आख्यात

वचसां तात्पर्यनिर्णायकत्वे सतीत्यर्थः॥पक्षद्वयं पाणिनितात्पर्यविरोधरूपं॥तच्चेष्टं॥देशाभ्यउच्चारणकाल एव तत्र

अस्मदादीनामुच्चारणस्याव्यवस्थितत्वात्पाणिन्युच्चारणकाल एव विवक्षणीयः॥ तथा च पाणिनिना कासांचित्परिभाषाणां उच्चा-
रणकाल एव तत्तद्वाक्यार्थबोधिताः शिष्याः॥ कासांचित्तु तत्कालेऽवाक्यार्थमबोधयित्वैव विधिदेशोतदनुसंधानपूर्वकं तत्त-
द्वाक्यार्थबोधिताः शिष्या इत्येतद्रूपस्य पक्षद्वयस्य तानं आख्यानमंतरा न संभवति॥ अनतिक्रम्येति॥ अविहायेत्यर्थः॥
अस्य स्वार्थं बोधयतीति शेषः॥ परावरयोगे चेति क्त्वाप्रत्ययः॥ अपूर्वकालिकत्वेन समानकर्तृकयोरित्यस्याप्राप्तेः॥ केचि-
दिति॥ एतदुत्तरं यथोद्देशपक्ष इति शेषः॥ परिभाषाविषय इति॥ यद्यपि भाष्येऽस्या संज्ञाविषय इति वक्तुमुचितं॥ तथापि
कैयटोक्तयथोद्देशपक्षस्य संज्ञाविषये कचिदावश्यकत्वेन परिभाषाविषय एव वैशेष्यसूचनाय पूर्वं तदुपन्यास इति बो-
ध्यं॥ सप्तमीनिर्देशादिकेति॥ ननु कैयटाभिमतयथोद्देशपक्षस्य कुतस्त्यागः॥ न च शास्त्रस्य उत्तमाधिकारिकत्वं न सि-
ध्यति फलाकांक्षायामपि आचार्यप्रणीतत्वेन स्यात्किंचित्फलमिति मंदाधिकारिकत्वस्वीकारात्॥ अतस्तत्परिभाषासा-
गर इति वाच्यं॥ यत्र हि विषये यथोद्देशत्वमिष्टं तत्र प्रागेव विधिबुद्धौ तत्र संस्कारकाकांक्षायां यत्र कार्यकालत्वमभिमतं तत्र प्राक्
परिभाषाबुद्धौ संस्कार्यसप्तमीनिर्देशादिके साकांक्षायां च स्यात्किंचिदिति तव मंदाधिकारिपरकत्वस्वीकारस्यावश्य-
कत्वात्॥ गृहीतपरिभाषार्थेन कालांतरे स्वीकारेऽपि सर्वशास्त्राभिज्वलनसंभवात्॥ वाक्यार्थदेशौ एक एवेत्याशयेन
एकदेश इत्युक्तिरपि॥ संस्कार्यविधीनामनेकत्वेन युगपद्बुद्ध्यनारोहेण तावतामुपस्थानासंभवस्य त्वन्मते॥ प्रथा

नेन गुणापकर्षणे । गुणेन प्रधानाकर्षणं च । अयुक्तं च क्ङिति चेति सूत्रस्थकैयटस्तु एकदेशिपक्षाश्रयणेनापवर्णनायमव
तः ॥ इत एवारुच्याज्ञयेति वक्ष्यांतरोपन्यासः कैयटे इति चेन्न ॥ परिभाषाणां कार्यकालपक्षाश्रयणे नत्रिपाद्यामप्युपस्थिति
रिति पूर्वत्रासिद्धमिति सूत्रस्थभाष्यस्य नत्र्योक्तरीतिमंतरा उपपत्त्यभावात् ॥ अत्र तत्तदुपपत्त्यर्थं यद्विधिविषये परिभाषाणां य
थोद्देशत्वमान्वोर्ये स्याभिमतं तत्र परिभाषाणामेवाकांक्षया तत्तद्विध्याकर्षणपूर्वकं एकवाक्यतौ नियमः ॥ यद्विषये कार्यका
लत्वमिष्टं तत्राविधीनामाकांक्षया परिभाषाकर्षेण पूर्वकं एकवाक्यतेति ॥ युगपदुभयनारोहेपि यथाबुध्यारोहः तथोक्त
व्यवस्थयैव एकवाक्यताकल्पनं नये परीक्षेन ॥ एतदेव कार्यकालपक्षे त्रिपाद्यामप्युपस्थितिल्लेखनेन प्रतिपाद्यते ॥ कार्य
कालेपि परिभाषाणां स्वदेशे वाक्यार्थबोधो भवत्येव ॥ बाधकाभावात् ॥ संज्ञाशास्त्रस्य तु वक्ष्यमाणस्वरसाच्च ॥ वाक्यार्थसंत
रासंस्कार एकज्ञानासंभवाच्च ॥ नच सर्वशास्त्राभिज्ञात्मकस्य पक्षद्वयसाधारण्यं भाष्यमिति ग्रंथेन यथोद्देशोपि वक्तव्यतया
तत्र परिभाषाणां स्वबुद्धिजननासंभवेन स्वबुद्धिजननद्वारेति ग्रंथस्य कथं समन्वय इति वाच्यं ॥ गुणभेदकल्पनया अनेकरू
पेणाजननस्य पक्षद्वयेपि निर्बाध्यत्वात् ॥ परिभाषाणामित्यस्य स्थितानामित्यादिः ॥ आसमभेदं परिकल्प्य स्थितानां परिभाषा
णां तैर्विधिभिः सह एकवाक्यता भवतीत्यर्थः ॥ एतेन एकवाक्यता भवतीत्यर्थे समानकर्तृत्वाभावात् क्त्वा न युक्त इति समाहि
ता ॥ परिभाषाणामेवोभयत्र कर्तृत्वात् ॥ वारयतीति ॥ स्वदेशे एकवाक्यार्थत्वमेव दस्त्वेतं नियामकमिति भावः ॥ ननु उ
क्तपक्षद्वयस्य संज्ञापरिभाषामात्रविषयकत्वे क्ङिति चेति निषेधसूत्रे कार्यकालपक्षोत्थयोग इत्यत आह ॥ निषेधेति ॥

पा

पर्युदासन्यायेनेति॥ क्ङितिनेत्यत्र नञ्भिन्नार्थकः। क्ङित्भिन्ने सार्वधातुके इत्याश्रयणेनेत्यर्थः॥ ननु असमस्तनञो न पर्युदासार्थक
त्वं अन्यथा अभूततद्भावे घटो नेत्यतो भूतत्वभिन्ने घट इति बोधापत्तिरत आह॥ प्रसज्येति॥ तेन सहेति॥ सा हि संज्ञाव्यवहितोत्तरकालि
केत्यरूपं तथा च वाक्यैकवाक्यतेति भावः॥ न टप्रागिति॥ संज्ञाशास्त्रार्थबोधं विना विधिवाक्यार्थस्यैवाभावे नासाकांक्षि
तत्वान्न स्वदेशे वाक्यार्थ आवश्यक इति भावः। ननु शास्त्रासिद्धत्वपक्षे स्वदेशे वाक्यार्थाभावेपि संज्ञाशास्त्रदृष्ट्या मुत्वं कुतो
नासिद्धमित्यत आह॥ कार्यार्थतयेति॥ कार्यज्ञानं चेति॥ प्रगृह्यसंज्ञारूपकार्यज्ञानं चेत्यर्थः॥ तद्देशस्थस्येति॥ तद्देशे उपस्थि
तस्येत्यर्थः॥ असिद्धत्वादिति॥ न चादो अदेस्य न मुत्वमीत्वयोः प्रवृत्तिकाले अणोऽभावेन अणो प्रगृह्यस्येत्यस्य न विषयः॥ तयोः
प्रवृत्त्यनंतरं अणो प्रेत्यस्य प्राप्तावपि न मुत्वस्य कर्तव्यतेति पूर्वशास्त्रकर्तव्यत्वाभावान्मुत्वं प्रति अनुनासिकविधेरसिद्धत्वाप्र॥
स्याकेरूपं तदेकवाक्यतापन्नसंज्ञाया असिद्धत्वमिति चेन्न। पूर्वत्र विषये इत्यर्थेन न मुनेरित्यस्य नैव शास्त्रप्रवृत्तरमापितेहि विषयता
स्वीकारेणासिद्धत्वप्रवृत्तेर्निर्बाधत्वात्॥ अत्रेदमनुसंधेयं॥ मुत्वशास्त्रैकवाक्यतापन्नपूर्वत्रासिद्धमित्येतद्दृष्ट्या अनुनासिक
शास्त्रैकवाक्यतापन्नपूर्वत्रासिद्धमित्यसिद्धत्वस्य नासिद्धत्वं॥ असिद्धत्वप्रतिपादकशास्त्रान्तरासद्भावात्॥ अन्यापि रहस्यं
शंकनीयं मुत्वदृष्ट्या अनुनासिकस्य तदेकवाक्यतापन्नसंज्ञायाश्च असिद्धत्वेपि मुत्वैकवाक्यतापन्नपूर्वत्रेत्येतद्दृष्ट्या कथमसिद्धत्वम
सिद्धत्वमिति॥ न चानुनासिकशास्त्रैकवाक्यतापन्नप्रगृह्यसंज्ञावाक्यार्थोत्तरं पूर्वशब्देन संज्ञामादाय मुत्वस्यासिद्धत्वे प्रसक्ते तत्
प्रतिपादकपूर्वत्रेत्येतद्दृष्ट्या संज्ञावाक्यार्थस्यासिद्धत्वं अनुनासिकीयपूर्वत्रेत्यनेन न क्रियत इति वाच्यं॥ विनिगमकाभावेन के

दाचिन्मुते एकवाक्यतापन्नासिद्धत्वस्यैव पूर्वंप्रवृत्तोसंज्ञादृष्ट्यापुनरसिद्धत्वस्य दुर्निवारत्वादिति चेन्न ॥ परत्वेन तदुपमर्दकत्वेन चानुना
सिकीयस्यैव प्राबल्यसद्भावे अनिरुक्तदोषानवकाशात् ॥ वस्तुतस्तु दोरुत्वादाश्रयात्सिद्धत्वमिति भाष्योक्ते नरछे । लांतरे आवश्य
केन समाधानेन अदसोमादिसे अतिमुत्वाद्यसिद्धत्वाभावनिर्वाहे तदर्थं मुत्व कल्पनं बकबंधनप्रयाससमं ॥ इत एवारुच्याउक्ता
र्थप्रमाणांतरमाह ॥ अत एवेति ॥ यथोद्देशपक्ष एवेति ॥ तेनापादानेमुत्तरणिकारकाणीति संगच्छते ॥ शास्त्रस्यादोभसंज्ञया पदसंज्ञा
बाधकत्वानुपपत्तेरित्यादिना शेखरोक्तफलं तु नयुक्तं ॥ भिन्नकालप्राप्तयोरपि आकडारसूत्रेण बाध्यबाधकभावस्वीकारेण भसं
ज्ञायाः निरवकाशतया पूर्वंप्रवृत्तायास्ततः पदसंज्ञाप्रसक्त्या अदोषात् ॥ दत्तरश्च भसंज्ञा जश्त्वाप्रवृत्तिस्तु फलं स्यात् ॥ आकडारसूत्रदृष्ट्या
जश्त्वैकवाक्यतापन्नपदत्वस्यासिद्धत्वात् ॥ जातिज्ञ शक्तिग्रहेणेति ॥ भविष्यतीति किंचिदनेनेत्यभिसंधिना सामान्यतः शक्तिग्रहे
शक्तिग्राहकशास्त्रोपस्थितिं विनैव गृहीतशक्तिस्मरणेन नित्यपाठाभावमपि व्यवहार इति भावः ॥ पुनरनुपदसंज्ञाविषये यथोद्देशसं
नियमे एकदेशविकृतन्यायेनेत्येन नन्वेवं कार्यकालपक्षे इयवतरणग्रंथेन विरोधः ॥ पिपठीरित्यादौ रुत्वे स्थानिवत्त्वाप्रवृत्त्यैतोव
पिरुत्वोपजीव्यपदत्वे सदुर्वारः ॥ मम तु कार्यकालत्वेन तस्या अपि त्रैपादिकत्वान्न दोष इति चेन्न ॥ आकडारीयसंज्ञाद्वयविरो
ध एव उक्तनियमांगीकारेण दोषाभावादित्याशयात् ॥ आहुरिति ॥ वस्तुतस्तु संज्ञाशास्त्राणां स्वदेशेपि वाक्यार्थः बाधकाभा
वात् ॥ संज्ञापरिभाषयोर्वैरूप्यकल्पनस्यान्याय्यत्वाच्च ॥ अदसोमादिसत्रभाष्ये परेवेयस्य तत्रमुत्वप्रकृतिभावरसपर्दः ॥
आशयानभिज्ञस्य प्रश्नः कथं कार्यकालमित्यादिरेकदेश्युक्तरमितिन तद्विरोधः ॥ तस्मिन्निति सूत्रस्थन्यायसिद्धभाष्यस्वारस्येन

पाठकृतपूर्वापरत्वस्यैवलाभात्॥अन्यथापरिभाषाणांकार्यकालेस्वदेशेवाक्यार्थेपिविध्येकवाक्यत्वाभावेनविरोधप्रतिसंधानाभावा
दष्टाध्यायीपाठकृतपरत्वाप्राप्त्यातदसंगतिः॥अतएववाहऊठ्सूत्रस्थशेखरस्यअदसोमादितिसूत्रस्थोद्योतस्यचनविरोधइत्याहुः॥
यथोद्देशपक्षइतिवाक्यैकदेशान्वायप्रयोगः॥कार्येणकाल्यन्तइति॥कलविलक्षेपइतिचौरादिकस्येदं॥क्षिपप्रेरणेइत्युक्तेः प्रवृत्त्यनुकूल
व्यापारस्तदर्थः॥प्रवृत्तिश्चोपस्थितिरूपातदनुकूलव्यापारश्चाकांक्षारूपः तथाचविधिशास्त्रजन्याकांक्षाप्रयोज्योपस्थितिविषयंसं
ज्ञापरिभाषमितिशाब्दबोधः॥तदेतत्फलितमाह॥प्राप्यतइति॥नचान्यतराकांक्षयापरिभाषाणामुपस्थित्यानदोषइतिगूढाभिसंधिनास
माधत्ते।यद्यपीति॥तदाशयानभिज्ञः तावतापिसंस्कारकदृष्ट्याविधेरसिद्धत्वेननदोषइत्याह॥तावतापीति॥सिद्धांतीस्वाशयंप्रकट
यति॥कार्यकालमिति॥नचेति॥ननुतद्देशस्थत्वंवारयतीतिपूर्वोक्त्यानेतद्दृढंकोथितिरितिचेन्न॥स्वसमीपंप्राप्यतइत्युक्त्याशिथिली
कृतस्यदृढीकरणार्थंयत्रांकायायुक्तत्वात्॥अष्टाध्यायीपाठकृतपरत्वेति॥ननुकार्यकालेतस्मादित्यादिपरिभाषाविषयेकथंविप्र
तिषेधसूत्रप्रवृत्तिः।परिभाषादेशेविध्येकवाक्यत्वाभावेनपरिभाषयोर्विरोधाभावात्॥विधिदेशेतदेकवाक्यतयाविधिसद्भावेपि
त्रिपादीस्थत्वेनविप्रतिषेधदृष्ट्यातयोरसिद्धत्वात्॥किंचतस्मादित्यादेरसिद्धशास्त्रेणैकवाक्यतैवदुर्लभा॥असिद्धशास्त्रदेशस्थ
त्वेपिप्रवहर्तृदृष्टांतेनस्वदेशस्थत्वानपायेनपौर्वापर्यसत्वात्परिभाषादृष्ट्याविधेरसिद्धत्वात्इतिचेन्न॥विप्रतिषेधशास्त्रविष
येपिकार्यकालत्वाभ्युपगमेनूआद्यदोषपरिहारात्॥नचपूर्वत्रासिद्धेनास्तिविप्रतिषेधोऽभावादुत्तरस्येतिभाष्यप्रामाण्येनतद्विषये
यथोद्देशत्वमेवेतिभ्रमः स्पष्टंचेदंपूर्वत्रासिद्धमितिसूत्रशेखरेइतिवाच्यं॥त्रिपाद्यांपरस्यासिद्धत्वेनविरोधाभावाद्विप्रतिषेधशा

५

ति

स्त्वाप्रस्यैव उक्तभाष्यो पपत्तौ यथोद्देश एवेति नियमे प्रमाणाभावात्॥ शेखरस्त्क असंगत एवेति तद्धृदं॥ एवमंसेपि परशास्त्रविषयकज्ञा
नस्य पूर्वं चासंभवे पि पूर्वशास्त्रविषयकज्ञानस्य परस्मिन् संभवेन तयोर्विध्याकांक्षयैव एकवाक्यतया ऽदोषात् परत्वादिकं॥ विध्येकवा
क्यता मात्रेण न स्वदेशत्यागस्याह॥ नहीति॥ प्रदेशो ष्विति विषयसप्तमी॥ अविशेषात् स्वसिद्धांते यथोद्देशेपि विध्येकवाक्यत्वसत्त्वादि
तिभावः॥ पक्षिवद्देशांतरगमनमपि नेत्याह॥ नहीति॥ ननु चेतनव्यापारेणाचेतनदार्वादेरपि गमनं स्यादित्याशंक्याह॥ नाप्यस्मादिति॥ य
थान्यदेशस्थघटादेरन्यत्र स्मरणमात्रेण न तद्देशत्यागस्तद्वदिति भावः॥ ननु शाब्दस्वरूपस्य शास्त्रस्योच्चारणाधीनसत्ताकत्वेन कार्य
कालपक्षे तदेकवाक्यतायास्तत्रोच्चारणप्रयोज्यतायास्तद्देशस्थत्वग्रहः फलभ एवेति चेन्न॥ अस्मदाद्युच्चारणस्य तद्देशस्थत्वग्राह
कत्वे ऽतिप्रसंगात्॥ तत्तदधिकरणत्वेनावगततात्पर्यविषयकार्थस्यैव तद्देशत्वकल्पनं युक्तं॥ तत्र तात्पर्यग्राहकस्तत्र सूत्रपाठ एवेति न कु
त्रापि दुष्टमिति तस्य तत्तद्देशस्थत्वमिति बोध्यं॥ प्रयोगरूपैकदेशस्थत्वेनेति॥ वस्तुतः विप्रतिषेधसूत्रवैयर्थ्यापत्त्या प्रयोगातिरिक्तदेशसंबं
धकृतपौर्वापर्यस्यैवांगीकारोऽदोषः॥ एवं यथोद्देशो विधीनां परिभाषादेशो संनिपाते पि गुणानुरोधेन प्रधानदेशकल्पनाया अन्या
य्यत्वान्न परिभाषानुरोधेन विधीनां परत्वव्याघातः॥ तस्मात्कार्यकाले संज्ञापरिभाषयोः देशद्वयकल्पनायामपि न दोष इत्या
हुः॥ इति यथोद्देशकार्यकालपक्षौ॥ अनुबंधेपदार्थमाह॥ इत्संज्ञा ईति॥ यद्यपि विधीयमानपदस्य पूर्वं प्रयोग उचितः। तथापि पूर्व
संगतिसूचनायैवमुक्तं॥ अनवयवा इति॥ बोधकस्येति शेषः॥ हलंत्यमिति सत्रांशः षष्ठः परसमीपे साधुत्तरग्रंथानुरोधात्॥ विधेये
इति॥ उपस्थाप्येऽर्थः॥ तेन धातोरविधेयत्वेपि न क्षतिः॥ ननु स्वं रूपमिति शास्त्रेण सूत्रोपात्तानुपूर्व्यवच्छिन्न एव शक्तिग्रहेण तस्यैव

भोक्त

5

उपस्थाप्यत्वेनान्निरनुबंधस्यकथंतदुपस्थाप्यत्वमितिचेन्न॥उपदेशोत्तरकालाइत्संज्ञेतिभाष्यात्‌लस्येप्रवृत्तेःपूर्वमेवइत्संज्ञालोपाभ्या
मपहारेणनिरनुबंधस्यैवोपस्थाप्यत्वसंभवात्‌॥अनुबंधस्यशक्तिग्रहेउपलक्षणतयाभानांगीकारेणशक्तिग्रहोपस्थितिशाब्द
बुद्धीनांसमानविषयकत्वोपपत्तिः॥अवयवत्वारोपेणेति॥सामीप्येबहुव्रीहिस्तुनानभिधानादितिभावः॥प्रयोगस्थस्येशिदादि
पदबोध्यत्वंतुतेषांस्वबोध्यपर्यंतंलक्षणयाबोध्यं॥व्याख्यानंतरइति॥दधन्चेत्यत्रकारेणासत्यप्रयुक्तइत्संज्ञाभाजांपूर्वोपकारकत्वं।
आदित्वप्रयुक्तइत्संज्ञाभाजांपरोपकारकत्वंइतिव्यवस्था॥एतस्यादित्वप्रयुक्तएतस्यांसत्यप्रयुक्तेतितुव्याख्यानतोनिर्णेयं॥पर
समीपेति॥परश्चासौसमीपश्चेतिकर्मधारयः॥ननुइत्संज्ञाप्रवृत्तेःपूर्वंअनुबंधत्वाभावेनानेकांतत्वापसक्तेःलक्षणाश्रयणंव्य
र्थमितिचेन्न॥अनेकांतत्वसाधकहेतोःभाव्यनुबंधत्वस्यापिसद्भावेनलक्षणायाआवश्यकत्वादिसाशयात्‌॥तथाचास्मिन्नुप
देशउपदेशत्वप्रातिपदिकत्वादिअनुबंधरहितएवेतिबोध्यं॥अतएवपचतइत्यादौतासोनुदात्तेत्वसिद्धिः॥अन्यथाउपदेशोऽदंत
त्वाभावान्नदेसंगतिः॥सूत्रेतुतुदतःअयःपुलभविष्यतीत्यादौचरितार्थं॥तदुक्तंभाष्येइदिश्चोपसंख्यानंकर्तव्यंपचतःसिद्धंअ
नेकांतत्वात्‌॥नन्वेवंतदनुबंधकपरिभाषयाधीमानिसन्नात्वसंतस्येतिदीर्घानापत्तिः॥सूत्रंतुभवतुशब्दादौचरितार्थं॥तथाम
तुवादेःपस्येत्वानापत्तिः॥हलाभिवाचामपिअनेकांतत्वेनतेनव्यवधानेनसामीप्याभावात्‌॥एवमिषाणेत्यादौछत्वापत्तिः॥
समुदायस्यैवाकारस्यापिइत्संज्ञकत्वाकारसमीपवृत्तित्वादितिचेन्न॥वामदेवात्‌ड्यत्‌ड्याविति ध्यमिर्याहकमानेनतदनुबंधक
परिभाषायाअप्रवृत्तेरंगीकारात्‌॥अत्वसंतस्येतिसूत्रस्थस्यअत्वसंतस्यदीर्घत्वेपितउपसंख्यानं॥अन्यथातदनुबं

धकपरिभाषयाक्षिप्तेनप्राप्नोति।तत्तर्हिवक्तव्यंनवक्तव्यमितिप्रत्याख्यानपरभाष्यस्यउक्तार्थेएवतात्पर्यं॥अथवायदुपदेशसामीप्यमा
दाययस्येसंज्ञातेस्यतदुपकारकत्वमितिस्वीकारान्नोक्तदोषः॥उपोत्तमंरितीतिसूत्रस्थंभाष्यंत्वेकेदेशरूक्तिः।तत्रहिउपोत्तमग्रहणंन
कर्तव्यंरितिपूर्वमित्येवसिद्धंतत्रायमभिप्रायः॥मतोःपूर्वमात्संज्ञायांस्त्रियामितिसूत्रपूर्वग्रहणंनकर्तव्यंभवतीत्युक्तं।अन्यथानीयरि
प्रत्ययस्यापिरित्वेनपचनीयमित्यत्रपकाराकारस्याप्युदात्तत्वापत्तिः॥अवयवावित्ववादिनोप्येवमेवगतिः॥मतुबादौउकारेसंज्ञा
लोपोत्तरंपकारेसंज्ञापित्त्वलभा॥रघुगमीतिसूत्रेअंगसंज्ञानिमित्तोरीतिअर्चीत्यर्थान्नरघाणेमादौदोषइत्याहुः॥वस्तुतएकां
तात्इति॥अत्रापिबोधकस्येतिशेषःपूर्ववत्॥तत्रोपालंभादिति॥बोधकेयेनसंबंधेनउपलभ्यतेतत्संबंधेनान्यत्रानुपालंभादि
त्यर्थः॥तेनन्यायात्यायाम्छेदनी।तत्रांविभिन्नसंबंधेनान्यत्रोपलभ्यमानत्वेपिनवृक्षादयवत्वभंगः॥शित्तीत्यादेमुख्यशितिका
र्यासंभवात्तद्बोध्येपर्यवसानमस्मिन्पक्षेऽपि॥स्यादेतत्॥विधेयेऽनुपलब्धावपिउपस्थापकेउच्चारणदशायांउपलब्धाअनें
कांतत्वेउक्तहेतुरप्रयोजकः॥अन्यथाशरीरावयवहस्तादेर्वृक्षादावनुपलब्धाअवनवयवत्वंप्रसज्येत॥एवंएकांतत्वसाधकःतत्रोपा
लंभादन्यत्रानुपलंभाच्चेतिहेतुरप्यप्रयोजकः॥महापटावयवस्यएकस्येवतंत्वादेःखंडपटमहापटादौसजातीयखंडपटकत्वसंबंधे
नसद्भावात्॥एकस्याएवगोव्यक्तेःबहुषुगोव्यक्तिसमुदायेषुसजातीयसंबंधेनउपलभ्यमानत्वादस्मिन्समुदायेइयमेवगोरिति
ते
प्रतीत्यनापत्तिश्च॥नष्टेघटेतत्कपालमादायघटांतरोत्पादेतत्तद्घटानवयवत्वप्रसंगश्च॥राजभ्यामित्यत्रस्थायांराजनूस्योध्वावय
वत्वेनगृहीतस्यनकारादेःनूभ्यामितिवर्णसमुदायेउपलब्धानलोपाद्यनापत्तेश्च॥नन्वन्यत्रेत्यत्रान्यशब्देनयन्निरूपितपस्या
तं

6

वयत्वं चिकीर्षितं न तदवयवे तदन्यतरत्वावच्छिन्नप्रतियोगिताकभेदवत एवग्रहणान्नोक्तदोष इति चेदेवमपि अवयवनिरूपितावयवि
निष्ठगगनवृत्तिशब्दादौ घटवृत्तिरूपादौ अतिव्याप्तिस्तदवस्थैव ॥ किं च तत्रोपालंभादन्यत्रानुपलंभाच्चेत्यत्रोपालंभः किं घटकत्वसंबंधे
न । उत संबंधसामान्येन ॥ आद्ये । उपालंभादियते वनिर्वाहे अनुपालंभादित्यस्य वैयर्थ्यप्रसंगः ॥ अंत्ये रामस्येत्यत्र सकारस्यांसत्वाप
त्तिरूत्वप्रसंगः ॥ न च स्यरत्वाकारकस्वरूपस्य घटादावनुपालंभेन घटादउपालंभेन परिहार इति चेत् प्रकृतेपि तुल्यं ॥ अत्र ब्रूमः ॥ विधे
येकदोष्यदर्शनादिति प्रतिपादनं सानुबंधेपाणिनिता त्पर्याभावनिर्णयद्वारा उपदेशत्वाभावप्रतिपादनाय ॥ अंत एवं त्यादिशब्दे
लक्षणया इत्संज्ञासाधनं उपपद्यते । मुख्यहेतुस्तु उपदेशघटकत्वादि त्येव ॥ हलंत्यमिति सूत्रे अंत्यशब्दस्वारस्येन सानुबंधे ता
त्पर्यनिर्णयात्तस्यैवोपत्वादित्वीकारेण एकांतत्वपक्षोपपत्तिः ॥ तत्रोपालंभादित्यस्य स्वघटकत्वसंबंधेनोपालंभादित्यर्थः ॥
अन्यत्रानुपलंभाच्चेति स्वरूपकथनं न तु हेतुगर्भं ॥ एतेनानेकांतत्वपक्षेउक्तानुमानेन विधेयानवयवत्वसाधनेसिद्धसाध
नं ॥ बोधकानवयवत्वमिति कृत्यांतरे तु इत्संज्ञालोपाभ्यामपहारेण सानुबंधस्याविधेयत्वोपपत्तेरप्रयोजको हेतुः ॥ अत्र
तु अंत्यशब्दे लक्षणानाश्रयणमेव लाघवमेवानुकूलस्तर्कः ॥ तदिदमुक्तं एवं हीत्यादिना । बोध्यबोधकयोरभेदाभिप्राये
णोक्तो हेतुरिति मते तु विधेयतादशायां तत्रानुपालंभेपि उच्चारणदशायां तत्रोपालंभाच्च तदवयवत्वोपपत्तेउक्तो हे
तुरप्रयोजकः ॥ एतेन संलप्तिपक्षेकस्याप्यसिद्धेरित्येव न्याय्यमित्यसंगतमित्यपास्तं ॥ नित्यत्वादिप्रवादेनैनिरस्तमित्याहुः ॥

कादेरिति॥ दध इतिदधासोरिति सूत्रस्थ विभाषाग्रहणेन णश्रयोरिसंज्ञाज्ञापनेनादोषः रसाशयेन कादेरित्युक्तं॥ हलंत्यमिति व
व्याख्यानान्निर्वाह इति चेत्लक्षणे वदोषः। यत्तु हलंत्यमित्येतद्भाष्यविषये अनुबंधाविनिर्मुक्तोपस्थितेरप्रामाणिकत्वेन वि
धेयेकदाप्यदर्शनादित्यनेकांतत्वसाधकहेतोस्तत्राभावेन णादेरेकांतत्वमेवेत्याहुस्तन्न॥ सिद्धे प्रयोगे कादिष्वपि अनुबंधा
दर्शनेन तद्रहिते एव पाणिनिप्रयुक्तत्वार्थनिर्णयादुपदेशावस्थायां तादेरपि तद्रहिते एव सत्त्वात्॥ अत्राप्यनेकांतत्वस्यैव सत्त्वा
त्॥ केचित्तु नानुबंधकृतमित्यादिपरिभाषा त्र्याकरणलाघवेनानेकांताइत्येवं न्याय्यमिति वदंति॥ तन्न॥ अनेकांतत्वप
क्षेपि अनुबंधानां मुख्यावयवत्वासंभवेपि इत्संज्ञादिसाधनाय समीपे गोणावयवत्वस्वीकारेण शब्दावनेकाल्त्वात्
मेङ्शदावनेजंतत्वाच्च नानुबंधकृतमनेकाल्त्वं नानुबंधकृतमनेजंतत्वमिति परिभाषाद्वयस्यावश्यकत्वात्॥ उपदेशे
जनुनासिकेति सूत्रे उपदेशग्रहणं तु स्पष्टार्थमेव॥ अनुबंधरहितेषु पाणिनिना तत्सत्त्वस्वीकारात् उपदेशत्वस्याकारेपि सत्त्वे
नपच्चतइत्यादौ स्वरसिद्धिस्तदाहादिगिति॥ नन्विति॥ सर्वादेशत्वमस्ति धेति॥ ननु रस्मादृशात्सादावणत्वात् सवर्णग्रहणं
प्राप्तमप्रत्ययइत्यनेन न निषिध्यते इत्युदित्सूत्रस्थभाष्यादनुबंधाविनिर्मुक्तपदार्थोपस्थितेः कथमेतदिति चेन्न॥ शब्दा
रोच्चारणसामर्थ्यादेव भूतपूर्वमनेकाल्त्वमादाय सर्वादेशो भविष्यतीत्याशयात्॥ यद्वा अनेकाल्घटितसमुदायत्वेति
धर्मप्रकारकोपस्थितिविषयादेशस्यैवानेकाल्त्वस्वीकारान्न दोषः इत्याशयः॥ सानुबंधकनिर्देशो यथा नडः स्थानित्यं

7

लोपमगो इति सूत्रे भाष्ये उक्तं तथा देशत्वमपि सूत्रोपात्तस्येवेति तत्र अर्थं विधौ निर्दिष्टो योऽनेकाल् इति सूत्रार्थे शीष्वरस्यापि उक्त एव
अभिप्रायः॥ अत एव लोपगुणवृद्ध्योर्न सर्वादेशत्वं॥ अर्थमिति॥ लोपो यीति सूत्राल्लोप पदानुवृत्त्यैव सिद्धे पुनर्लोपग्रहणात् घसोरि
ति लोपस्य सर्वादेशत्वसिद्धेर्नेतदर्थमपि शिद्ग्रहणं॥ असंजातविरोधन्यायेन उत्तरत्रैवाल्लोपे परिभाषाबाधसंभवादिति भावः।
तापकमिति॥ ननु लोपेऽपि तेऽपि पुनर्व्यर्थं॥ शकारोच्चारणसामर्थ्येनानुबंधकृतमपि अनेकाल्त्वमादाय सर्वादेशत्वसिद्धेः॥ नन्वो
च्चारणसामर्थ्यादि संज्ञालोपो बाध्येतातो ज्ञापनासूर्वमपि तयोरबाधाय शिद्ग्रहणं स्यादिति तु न शंक्यमेवं॥ अनेकाल् इत्यत्र ध
र्मप्रकारकोपस्थितिविषये साधिसूत्रार्थे नैव प्राप्त्यो सर्वादेशताया: सामर्थ्यसिद्धत्वाभावात् इति वाच्यं॥ असंजातविरोधन्या
येन पूर्वं प्रवृत्तयोस्तयोस्तयोर्बाधायोगादिति चेन्न॥ सर्वत्रैवानुबंधपदस्य तद्योग्यपरता॥ अत एव ङ्णोर्विषयेनानुबंधकृते
मसारूप्यमिति विकल्पाभावः॥ इत्संज्ञायोग्यशकारवत्त्वमेव तत्सूत्रे शित्वमिति स्पष्टं जसः शी इत्यत्र शो स्वरे। एवं च शी आदेशस्य
सर्वादेशसंपत्तये शिद्ग्रहणं स्यादेव रूपकृत्वमिसारूप्यात्॥ नन्वत्र सामर्थ्ये शि सर्वनामस्थाने इत्यत्र विशेषणार्थं शकारस्य चरि
तार्थ्यात्॥ वस्तुतः परिभाषारंभसामर्थ्यात्तत्र अनुबंधयोग्यपरतास्वीकारेऽपि अन्यत्र तथा गोकारे मानाभावात् न तद्ग्रहण
प्रयोजनमिष्यते॥ तदाप्रत पूर्वानेकाल्त्वमादायापि न सर्वादेशत्वं इत्यर्थज्ञापनार्थं तदावश्यकमिति बोध्यं॥ तेन दिव उत् दिव
औ दिसनयोर्न सर्वादेशत्वं॥ ननु तत्र तपरोऽन्त्योच्चार्यते। अत एव न तेसामर्थ्याद मत्सयत्वेऽपि स्वरितः॥ भाव्यमानोऽप्युकार इति च
परमसिद्धांते ऋदतउदिसनेमैवत्ताप्यत्ते इति किं तस्य फलं इति चेन्न॥ पूर्वाधिरावराणामिति विहितअधूअवूर् इत्यत्र द्विषयेऽस्या
प्रसर्पं तस्यावश्यकत्वात्॥ न च पूर्वस्य असिपुरूधरावर्योरधू इति उधुन्यासेन सिद्धा गुरुन्यासकरणान्न सा॥ योगविभा

गस्यअस्तीति चेत्[?]तदर्थं मेरुकृपु तेश्चापत्तेः॥एवमित्यस्य स्थाने अस्य अनयोरिति करणे गौरवं॥न च विजातीयवर्णोच्चारणान्न
सा सजातीययोरेकशेषापत्तेः॥न च नौवयेति सूत्रे शेखरोक्तदिशा पुरुषो द्वंद्वानंतरं अव शब्देन द्वंद्वेन दोषः॥प्रथमोपस्थितअ
धूत्रापेदरस्य बाधेनापि विजातीयोच्चारणसार्थक्येनापरत्रेत त्बाधेमानाभावात्॥एवमित्यंरस्मत्र एते तावितिविधीयमा
नेतादेशोत्तेकारस्यइत्याप्रवृत्तिरपितस्फलं॥नानर्थके इति परिभाषा तु भाष्ये प्रत्याख्याता॥न च नानर्थकेस्याभावेपिर
त्लोपोत्तरं अकारमात्रविधाने दकारस्याकारे यणियमिति साध्यं॥तत्रेश्वयः सावितिसूत्राधरस्यनुवृत्यर्थांपुंसिरदः अकारवि
शिष्टयकारविधानेनैव सिध्याअकारादेशविधानसामर्थ्यात्सर्वादेशसिध्या यकारविधानं व्यर्थं तत्सामर्थ्यान्नेसंज्ञेतिक
थमेतत्फलमिति वाच्यं॥यकारविधाने एवोय मित्यत्र एतत्तदोरिति सुलोपापत्त्या फलभेदापत्तेः सामर्थ्यस्यव कुमशक्य
त्वात्॥न चैवमपि हल्लिलोपेनैव निर्वाहे अनादेशविधानसामर्थ्यादिदमादेशोऽस्त्वोप्रवृत्तिरितिज्ञापनान्नोक्तदोषइति वा
च्यं॥इत्यादेशोपि रत्याप्रवृत्तिप्रसंगात्॥अनादेशविधानं तु तन्मात्रेरत्वबाधेन चरितार्थमित्यलं॥उगिदिविषये त्विति॥आदि
नाज इसः शीज इत्यासोशिरित्यादि संग्रहः॥न च नुपूर्व्यान्त त्वस्वीकारे ऽपि च सामर्थ्याद्यभस्यापि टेलोपरस्यनुपपन्नमिति चे
न्न॥अन्यानुबंधेउच्चारणीये संदिग्धोच्चारणेन तत्कल्पनेभविष्यती त्याशयात्॥केचित्तु भरस्य व स्थायांअनेकाल्त्वस्येव
शाप्यते न चैवं कर्तैस्यादो गुणस्य सर्वादेशतापत्तिः॥अनेकाल्त्वस्य तदाश्रयत्वाद्वर्णादेशस्याविघातइति स्थानेंतर
तम इति सूत्रभाष्ये एव समाधानात्॥उगिदिविषये वानुपूर्व्यान्त इत्याहुः॥अनुबंधानामत्त्वस्य व्यवहाराभावबोधनहू
रेति शेषइति [?]शेखरोक्तं तु न युक्तं॥यस्मिन्विधिरिति परिभाषयाशिदादावित्यर्थानापत्तेः॥यदि तत्र यस्मिन्विधि

स्तदादेवर्णग्रहणेऽइतिपाणिनदोषः॥ स्पष्टंचैतत् ष्यङः संप्रसारणमितिसूत्रेभाष्ये। तत्रहि पसादावियर्थमात्रां वयवर्णग्रहणाभा
वादसिद्धमितिसमाहितमिक्ष्यते। एवमपिनदीदेवी-चोरीविमबलदिवीसादोस्थानिवत्तेनहल्ङ्याब्दिलोपवलिलोपाप्रस
क्त्यातदर्थेअनुबंधमात्राव्रत्तिधर्मनिमित्तकंकार्येअनुबंधादेशोनेतिकल्पनेप्रकृतपरिभाषायाः क्वचिदप्रवृत्त्यर्थमनित्यत्वकल्प
नापेक्षयानानुबंधकृतमनेकाल्त्वमितिपरिभाषापेक्षयापृथक्क्वचिदनुबंधकार्येप्यनल्विधावितिनिषेधइतिवचना
रंभस्यैवयुक्तत्वादितिविभावनीयं॥६॥ पलोपोत्तरमावेइति॥ ननुढौकितेसादावासवारणायउपदेशेइत्यस्यविपरिणामेनविशे
ष्यतयातदंतविधौसमुदायएवऋषितात्पर्यस्वीकारेणवपलोपोत्तरमावेऽसनुपपन्नं। नचउपदेशेयोवृत्तदंतधातोरित्यर्थान्न
दोषः॥ धातोरित्यस्यनिवृत्तेरिस्कृतरग्रंथेविरोधादितिचेन्न॥ इत्संज्ञालोपोत्तरंधातुसंज्ञादिकार्यप्रवृत्तेयेतावतोप्युपदेशात्ता
त्पर्यस्वीकारेणादोषात्॥ यत्तुपैलोपोत्तरंतदेवेदमितिप्रत्यभिज्ञयाएकाज्इत्सादावित्रउपदिश्यमानएजंतत्वसत्वेनादोषइति
तेन्न॥ तुल्यमुत्पाहत्तरत्सादावपिनलोपोत्तरंउपदेशावसद्भावेनतास्यनुदात्तेतिल्सार्वधातुकअनुदात्तत्वापत्तेः॥ उदीचामाङ
इति॥ तत्रअर्तीहादार्थकमाङःस्तकनग्रहणं॥ एतद्भाष्यप्रामाण्येनतदनभिधानात्॥ यत्तुवदंति॥ यथ्युत्तिचपदेइत्सत्रपदग्रह
णात्घसंज्ञासूत्रेनदीतरेकृस्वापादनपरभाष्यप्रामाण्यात्स्थानिवत्सूत्रेऽतिखट्वद्वयेप्रदीर्घेकृतेआवत्तोभूतपूर्वइतिभाष्यो
क्त्यअनुबंधसहितशब्दोपादानेइत्संज्ञकतदवयवकेइत्यर्थः। स्त्रीलिंगप्रकरणेत्राष्टरत्नेप्येवं॥ तथापितदनाश्रित्यइदमिति॥ त
न्न॥ नदीतरेप्रतिमेषोऽप्रतिषेधःऔपदेशिकतरपोग्रहणात्। सर्वेषेवसानुबंधकेपुरूपमाप्नीयतेयत्रास्येतद्रूपमितिरूप

निर्यह्रश्वनांतरेण लौकिकं प्रयोगं तस्मिंश्च सानुबंधकानां प्रयोगो नास्तीति द्वितीयः प्रयोग उपास्यते कोसावुपदेशो नामेति॥ घसं
ज्ञासूत्रस्थ नदीतरे इति वार्तिकप्रत्याख्यापकभाष्येण ईदृशार्थस्यातिरस्कृतत्वात्॥ औपदेशिकप्रयोगे वस्यादिकार्यबाधात्तत्र
द्वोध्ये पर्यवसानेन रसंज्ञकतदवयववकः क्वचित्पर्यवस्यति रस्त्यन्यत्॥ टकारे संज्ञकाकारस्येति॥ शब्दरत्नोपि पर्यवसितार्थमादा
येव। वाच्यं वस्तुतु औपदेशिकाडादिपदबोध्यस्य वस्यादीत्येवार्थः॥ प्रकृते पि औपदेशिकदापबोध्ये रसर्थः॥ तत्वं तु न हि देयप्र
कृतिकस्यास्ति येन विनैव परिभाषां निर्वाहो भवेत्। उभिश्च पदैरस्य त्रपदग्रहणं तु सिद्धांतेपि अर्थमेव। वेत्रूमप्रकृतिकस्य लाक्षणि
कत्वात्॥ संप्रसारणोत्तरं अकारे संज्ञकोकारस्य कथमप्युपपादयितुमशक्यत्वाच्च॥ अत एवाणूणयोः अमूत्रयोः चिण्णिचो
श्चपूयकोर्न कार्यसंकरः। आबसोभूत पूर्व इति भाष्यं तु मृभूत पूर्वो प्यमाद्यतेति न तदुक्तो साधकमित्ति दिक्॥ यदप्याहुः॥ भाष्ये तु पायांतर
प्रदर्शनेन अस्यानावश्यकत्वं सूचितं॥ तथा हि नायं देपाकं लुदिवादि लुदा पशोधने इति पठ्यते॥ दायती सत्र स्वरभेदस्तेन उभयोर
प्याद्युदात्तत्वात्॥ ताच्छीलिके चानशिदायमानश्यत्राषिदायमानश्यत्रापि न स्वरभेदः श्यन्स्वरस्य सतिशिष्टत्वेपि अन्यत्र विकरणोप्य
रस्कृते तस्य दुर्बलत्वादिति तन्न॥ अन्यत्र विकरणेभ्यः रसस्वधर्मिकग्राहकमानेन यत्रावि कारणस्य स्वरभाक्त्वं तत्रैव प्रवृत्तेः॥ अतए
व ओलसमाने रवश्चेति सूत्रे पंडितं मन्य इत्यादौ कर्तृकर्मवद्भावो वत्कर्मः यकि अंतोदात्तत्वं यथा स्यात् श्यनि अंतोदात्तत्वं माभूत्॥ न च
श्यन्यपि स्वरः स्वरो बाधको भविष्यति। सतिशिष्टः श्यन्स्वरः प्राप्नोतीत्युक्तं भाष्ये॥ तोसि ग्रहणेन सतिशिष्टोपि स्वरः सार्वधातु
कं न बाधत इति दतदग्रिमभाष्यं तु एकदेशिनः॥ अत एव न त्रुमतेति सूत्रे लुमग्निप्रतिषेधे एकपदस्वरस्यापसंख्यानं सर्वामंत्रि
तसिज्लुक्वर्जे। माहि दातां इत्यादौ आदिः सिचोन्यतरस्यामिसेष स्वरो यथा स्यादित्युक्तं भाष्ये॥ अत एव भाष्ये परिभाषायां

भु

१

इत्यदघटित्तेतिपठितं ॥ च्लि लुङि इति सूत्रेभाष्येपि लुकः सिजपवादे विज्ञायमाने माहि[illegible]दातामित्यादो आदिः सिचोन्यतरस्यामिति षस्व
रेण न प्राप्नोतीत्युक्तं ॥ विकरणस्य स्वरभाक्त्वाभावेपि तत्स्वरवृत्तौ तदसंगतिः स्पष्टैव ॥ आदिः सिच इति सूत्रं तु माहिलाविषमित्यत्र चि
स्वरबाधेन चरितार्थं ॥ नन्वध धर्मिग्राहकमाने न श्रूयमाणविकरणस्वरस्यैव दुर्बलत्वेन बोधनान्न दोष इति वाच्यं ॥ माहिकाष्टा
मित्यादो आदिः सिचोन्यतरस्यामिति पाक्षिको दात्तेन भाव्यमिति च्लेरिति सूत्रस्थ कैयटस्य आदिः सिच इति सूत्रस्थ शेखरस्य चासंग
त्यापत्तेः ॥ अत एवोदीचां माङो इति सूत्रं नाकारि ॥ किंच देङ् धातोः शतरि ततआच्छाणिचि टिलोपे ततएरचि णेर्लोपे बहुव्रीह्येन
समासे ततष्टापि ततः के ह्रस्वे समुदायात् टापि बहुदायिके सत्र धात्वंत यकरस्य नेन निसर[illegible]त्वानापत्तेः ॥ णिचः स्थानिवत्त्वं तु न ॥
तस्यो गित्यश्चेति सूत्र शेखरोक्तरीत्या इत्वस्य बहिरंगासिद्धत्वात् ॥ किंचेदायदायरेति यस्यां क्रियायां आख्यातमाख्यातेनेति समा
से ततः के टापि ह्रस्वे दयदायिके सत्र धात्वं तयकोरिति निषेधे त्वानापत्तिः ॥ रपनो धात्वनवयववत्वादि सत्यत्र विस्तरः ॥ उपदिश्यमान ए
जंस्येति ॥ मिनाति मीनोतीति सूत्रे एज ग्रहणानुवृत्ति सामर्थ्यात्स्वरनिमित्तस्य ए च आत्वं [illegible]सर्व[illegible]मोप्यित्र उपदेशग्रहण प्रत्याख्या
नं परमादेच इति सूत्रस्थ भाष्ये स्वैकदेशोक्तिः ॥ मीनाति मिनोतीति सूत्रस्थ भाष्यविरोधात् ॥ अत एव ममाविसादि सिद्धिः ॥ अन्य
था द्विर्वचनेचीति गुणाभावे मिमाविसाध्यापत्तिरिति भावः ॥ वस्तुतस्तु उपदेशो य एच् तत्स्यात्वमित्यर्थे अनुबंधसत्वे प्यात्व प्रव
त्यापरिभाषारंभो व्यर्थः ॥ तन्वएधादो तदापत्तिरिति वाच्यं ॥ उच्चारणसामर्थ्येन परिहारात् ॥ इरे प्रभृति षात्वामेवेत्त्वेयोरित्य
रेत्वयोग्यताया ॥ ह्रियतस्य वृत्तिस्वीकाराच्च ॥ नन्वोपदेशोत्तरकाले संस्ते तिभाष्यात् पूर्वं मिसं तालोपो स्यात्तामिति चेन्न ॥ परि

ने

भाषारंभेप्यस्यप्रसंगस्यदुस्तरत्वात्॥किंचधातुत्वप्रययात्राध्यर्थेअनुबंधरहितेपितात्पर्यविषयत्वावश्यकत्वात्॥एजंतोपदि॰
श्यमानइत्यर्थेपिआत्वं अनुबंधसद्भावदशायांफलभेदेवेतिप्राहुः॥ननुबंधकृतमसारूप्ये॥असारूप्यमिति॥नन्वसा
रूप्यंऔपदेशिकंअहोस्वित्प्रायोगिकं॥नाद्यःअसरूपग्रहणानर्थक्यप्रसंगात्॥नांत्यः॥परिभाषावैयर्थ्यप्रसंगात्॥किंचप्रयो
गेक्विपोदर्शनात्॥उत्सर्गीयरूपसमानरूपाभाववानयमपवादइतिबुद्धेरभावेनग्रामणीःग्रामणायेसादौ किबणोविक
ल्पेयातामितिचेन्न॥असरूपापवादउत्सर्गस्यबाधकइत्युक्तयाविधानकालिकअसारूप्यस्यैवशब्दमर्यादयालाभेनका
णोर्विकल्पप्राप्तौपरिभाषारंभस्यावश्यकत्वात्॥नचैवंलादेशेष्वसरूपविधिर्नास्तीतिपरिभाषारंभपरत्वासरूपसूत्रस्थ
भाष्यविरोधः॥लकाराणांविधानकालिकासारूप्याभावादितिवाच्यं॥तदग्रेअथवेत्यादिनानुबंधकृतमसारूप्यमिति
परिभाषारंभपरभाष्येणलादेशेष्वितिपरिभाषायाअनावश्यकत्वसूचनेनतद्विरोधाभावादित्याहुः॥अभिधाननियामकत्वमि
ति॥तात्पर्यंतावच्छब्दबोधेप्रयोजकमितिमतेअभिधाननियामकत्वंनामअर्थविशेषेतात्पर्यग्राहकत्वं॥तदभावेअर्थविशेषो
पस्थापकत्वं॥तत्वं॥प्रकरणसहकृतात्पदत्तानादर्थविशेषोपस्थितेरनुभवसिद्धत्वादितिभावः॥संतेति॥ननुकृतिशब्देतत्सं
भवः॥अर्थवत्संतेइतितुनार्थः॥तिग्रहणबलेनअर्थवद्ग्रहणपरिभाषायाअपिबोधसंभवादित्यरुचेराह॥शब्दंतावेति॥शो
द्धार्थेतिद्वंद्वः॥नबोधोपयोगीति॥ननुसर्वादिशब्दानांसामान्यतःशक्तिग्रहादेवशाब्दबोधइतिनैषप्रयुक्तोनियमइतिचे
न्न॥नानार्थकहर्यादिशब्दवद्बुध्यादिशब्देविशेषतःशक्तिग्रहस्यैवशाब्दबोधोपयोगित्वात्॥शक्तिग्रहशाब्दबोधयोःसमा

भा

10

नयकारककर्त्तर्येवकार्यकारणभावांगीकारादिरन्यत्रविस्तरः॥ ननुअध्येताध्यापितेति॥ स्यादिति॥ क्ङितीति चेत्सत्रक्ङितीति निमित्तसप्त
मी तन्निमित्तग्रहणं कर्त्तव्यमिति वार्त्तिकात्॥ भाष्येक्नोः किं त्वेन तत्संख्यानाच्चेति भावः॥ न च निमित्तसप्तमीपक्षे युताअयुषीदि
त्यादौ गाङ्कुटेतिङित्वेन तासादेर्ङित्वेपि तिप्निमित्तकः पुगंतेति गुणो दुर्वार इति वाच्यं॥ विकरणेभ्यो नियमो बलीयानिति
पक्षाश्रयणेन तासादेः पूर्वं तिपि तस्य गाङ्कुटेति ङित्वेन तद्वारणात्॥ पिच्च ङिन्नेत्यस्य तु नायं विषयः। अतिदेशप्राप्तङित्व
स्यैव तेन वारणात्॥ अत एव यास्कटोः ङित्वस्यापि त्वेन न बाधः॥ यद्वा उक्तलक्ष्ये गुण इष्ट एव अन्यथा परसप्तमीत्वपक्षेपि
अंतरंगे निषेधे बहिरंगस्य गुणस्यासिद्धत्वेन निषेधाप्रवृत्तौ गुणो दुर्वारः। स्पष्टा चेयं रीतिः क्ङिति चेत्सत्रभाष्ये॥ दीक्षितमा
धवाद्युदाहृतयुतेति गुणरहितपाठस्तु असुक्त एवेत्याहुः॥ प्रकृतिमात्राश्रयणेनांतरंगे निषेधे गुणस्य बहिरंगासिद्धत्वं तु
न॥ दीधीवेवीटामिति गुणनिषेधारंभेण सामान्यतः इदृशो विषये तदनित्यत्वज्ञापनादित्याशयात्॥ यद्यपि शायितोअरि
रिषतीत्यादौ कार्यानुभवितृत्वं इकारादेरस्तस्तदुत्तनिमित्तत्वबाधेपि तदुत्थितसमुदाये निमित्तत्वं दुर्वारं। तथापि अवयवद्वा
रा तादृशनिमित्तत्वस्यापि बाध इत्याशयात्॥ कुण्डनवीषतीत्यादिसिध्येरिति॥ अत्रा चोद्दिष्टनिमित्तकत्वं अजादेशनिमित्तक
त्वं च तद्भावभावितामात्रेण बोध्यं॥ अत एव चक्रतुरित्यादिसिद्धिः॥ सन्यङोरित्यस्य षष्ठीत्यादिति। अत एव प्रतीषिषतीत्या
दौ द्वित्वसिद्धिः॥ न चात्र सन्नेहद्वित्वं प्रतिकार्यित्वेनेत्यं प्रतिनिमित्ततो न स्यादिति वाच्यं॥ अरार्यतरेति भाष्योदाहरणेन प्रयासस्यादे
यंप्रातिकार्यित्वं तन्निरूपितनिमित्तत्वाभावस्यानयाप्रतिपादनात्॥ समवायीति नन्वयवयवावयविनोः समवायस्यानुभवाल्लोके

निमित्तकारणत्वादंशस्य समवायिकारणमदस्य भेद इति शाक्यं वक्तुं शास्त्रे तथाभ्युपगमे किं मानं॥ दर्भाणां स्थाने शरैः प्रस्तरितव्य
मितिवत् वर्णानां प्रसज्यमसंज्ञकसंबंधसत्त्वेपि अवयवावयविभावस्यालाभात्। सत्यं। कार्याः शब्दाः मृत्कूटवत् रकारादयः एका
रादिविशेषेण परिणमंते इत्येकदेशिमतावलंबनेन एतद्ग्रंथप्रवृत्तेः॥ ननु कालघटयोः संयोगं प्रति कालस्य निमित्तत्वेन समवायि
कारणत्वेन च तयोर्भेदोपि दृष्ट इति वाच्यं॥ कालस्य साधारणकारणतया असाधारणकारणविषये भेदस्यानियतत्वेनादो
षात्॥ ध्वनितमिति॥ तत्र हि कार्यातिदेशे चकृतुरित्यादो अनकाराभ्यासता प्राप्नोति रसादेशस्य अज्ग्रहणेन रूपातिदेशात्स
माहितं॥ ततोऽधिजगे इत्यत्र रूपातिदेशे इवर्णाभ्यासतापत्तिर्दोषः॥ गाङ्लिटीति ङित्करकनिर्देशेन परिहृतः॥ एवं चाधिजगे
इतिवत् अरिरिषतीत्यत्र दोषानुद्भावनेन ध्वनितं भगवतेति भावः॥ ननु अचि किं जेघ्रीयते इति प्रयोजनपरं भाष्यं माकुप्येत॥
नटभार्याय व्यंजनानि भवंतीति षाष्ठभाष्येण द्वितीयाजवधिकस्य द्वित्वे कार्यिणो यञो निमित्तत्वबाधादिति चेन्न॥ स्वरांतरे
व्यंजनान्युत्तरस्येति भाति शास्त्रानुरोधेन तदुपपत्तेः॥ वस्तुतः एषा परिभाषा निष्फला॥ कारकविभक्तेर्बलवत्त्वेन क्ङिती
तिसूत्रे औपश्लेषिकसप्तमीत्वस्वीकारेण शयितरीत्यादिनिर्देशोपपत्तेः॥ ननु क्ङितीत्यस्य औप[illegible]श्लेषिकत्वे कृते तस्या
अन्वयः॥ न तावद्गुणपदे अध्याप्यनभिनिर्वृत्तेः॥ नाप्यभावे तस्यामूर्तत्वात्॥ नापि इक्पदे तस्य इग्लक्षणपरत्वेना
योग्यत्वादिति चेन्न॥ यत्र इक इति ये गुणवृद्धी विधीयेते तत्र क्ङिति प्रतिषिध्येते इति परिभाषात्वावगमेन तत्र तत्रौप

रतिज्ञापनात्

॥

स्थितांगपदेनान्वयेनादोषात्॥ नतु पुगंतेति सूत्रे रकः प्राधान्यात्तत्रैवान्वये भिन्नमित्यादौ निषेधाऽनापत्तिः॥ न च क्नोः क्वित्वसाम
र्थ्यादेकवर्णव्यवधानेपि न दोषः॥ नन्वोर्विभाषेत्यत्र नुग्रहणेनाग्रहणार्थं तु न तत् नसाहचर्येणाव्ययस्यैव ग्रहणादिति वाच्यं॥
काम्यच्श्चश्रवणार्थत्वेनापि सार्थक्यसंभवात्॥ न च हलंताच्चेति कित्वविधानं तद्ज्ञापकं॥ धिप्सति सिस्क्षतीत्यादौ न लो
पस्यामभावस्य च संपादनेन चारितार्थ्यात्॥ न च ढ्लोपसूत्रस्थाण्ग्रहणात्तज्ञापकात्तल्लाभः॥ क्नोः क्वित्वाभावे भूतपूर्वलघूपधत्व
कत्वनस्याप्यभावेन ठ्व ढ्र इत्यादौ गुणाप्राप्त्या चारितार्थ्यात् इति चेन्न॥ क्नोः क्वित्वस्य रत्संज्ञालोपासकज्ञोस्तद्ध्यबाधापेक्षया
क्विंचिदंशे अव्यवहितांशस्य बाधस्यैव न्याय्यत्वात्॥ अत एव भेत्ते इत्यादौ कित्वेन भूतपूर्विकेस्तज्ञापनाद्गुणासिद्धिः॥ अथात्रैर्धेरु
दविदेति कित्वविधानमपि लिंगं॥ न चैवमपि अकार्ष्टमित्यादौ तामोऽङित्वात् तेस्मिन् परतः एकवर्णव्यवहिते इकि इट् धोर्निषेधाप
त्तिः॥ निमित्तसप्तमीत्वोक्तुनायं दोषः॥ साक्षान्निमित्तग्रहणेपि परंपरया निमित्तस्याग्रहणादिति चेन्न॥ ज्ञापकसोजासेन ए
कवर्णव्यवधानेऽपि निषेधस्य गुणमात्रविषयकस्यांगीकारात्॥ सिचि वृद्धिरिति सूत्रस्थं परस्मैपदग्रहणमप्यात्रार्थेलिं
गमिति॥ एवं द्विर्वचनेचीत्यत्र द्विरुच्यते अस्मिन्निति युसत्त्वा अरिरिषतीत्यादावपि न दोषः॥ नहीकारे परे द्विरुच्ये किंतु तदेव द्वि
रुच्यते उर्णुनविषतीत्यत्र रेफे परे द्विरुच्यत इति भवत्येव द्विर्वचनेचीत्यस्य प्रवृत्तिः॥ अतः सिद्धं परिभाषानारंभणीयेति॥
अत एव प्रतीषिषति आर्धिधिषतीत्यादौ सन्यत इति इत्वसिद्धिः॥ अन्यथा तत्र सनीत्यस्य निमित्तसप्तमीत्वेन सनो द्विर्वनि

मित्तत्वाभावात् सन्निमित्ताभ्यासाभावेन इत्वानापत्तिः॥ नन्वस्तु तत्र परसप्तमी पापचिपतइत्यादौ इत्वं तु न सन्यतइति तत्परत्वस्य
विवक्षितत्वात्॥ यङो ह्लोपस्य स्थानिवत्वादिति शेखरोक्तसमाधिस्तु असंगतः॥ अभ्यासकार्ये तन्निषेधात्॥ चिषादयिषेती
त्यादौ विवप्रसयांतव्यवधानेपि तस्य वृत्ते दुर्वारत्वाच्च॥ अस्मिन् विषये अस्मने दीर्घस्य यथा न प्रसंगः इउ ह्लोपाभ्यां वा यथा निर्वाहस्त
थाप्रत्ययग्रहणपरिभाषाव्याख्याने प्रपंचयिष्यतेइति चेन्न॥ एवमपि सनीसस्य परसप्तमीत्वाश्रयणे ईर्ष्यतेः सनो द्वित्वे ईर्ष्यि
षिषतीत्यत्रे सन्यतइति इत्वानापत्तिर्दुर्धरैव॥ आगमसमभिव्याहारे केवलेस्यार्थवत्सन्प्रत्ययत्वाभावात्॥ किंच उक्तपरिभाषांगी
कारे चिकीर्षतीत्यत्र एकादेशस्य स्थानिवद्भावेन तुग्वारणपरस्तु देति ङः सूत्रस्थभाष्यस्य ओंबक्षेत्यादौ तयैव परिभाषया लुग्वा
रणपरतद्राजसूत्रस्थभाष्यस्य परमायमित्यादौ पूर्वोत्तरेति परिभाषया एकादेशवारणपर अदसो औ इति सूत्रस्थभाष्यस्यासंगत्या
पत्तिः॥ अत एव शाधीत्यादौ हेः कार्यित्वेपि असिद्धत्वात् ल्लाश्रयनिमित्तापेक्षया अन्यूनानतिरिक्ताश्रयनिमित्तके आदेशस्य
आभीयत्वासिद्धत्वमुपपद्यते॥ अत एव गोमत्प्रियइत्यादौ लोपकार्यिणोपि रूपः अंतरंगकार्यनिमित्तविनाशकत्वुक्तानिवृ
त्तिश्चोपपद्यते॥ परं तु एतत्पक्षे दध्योइत्यादौ एकादेशोत्तरं द्विर्वचननिमित्तप्रत्ययपरत्वाभावेन द्विर्वचनेचीत्यप्रांचोक्तनिषे
धपक्षावलंबनं कर्तव्यं स्यादिति विभावनीयमित्याहुः॥ ५॥ यदागमाः॥ दापेर्नस्यादिति॥ घुसंज्ञायाः णत्वे देशस्थतयाअ
सिद्धत्वेन पुकः प्रागप्रवृत्त्या असिद्धत्वात् पूर्वं धातुः साधनेनेति सिद्धांतात्वणत्वस्यापि पुकः प्रागप्रवृत्सात दुत्तरं नेर्मो
दाधोर्वध्यवंतौ इति घुसंज्ञा सूत्रस्थभाष्येण तद्गृहीतस्यार्थवत्त्वाभावो यथा यल्क्रियोयुक्ताइति न्यायेन नेर्गदेति णत्वं न भवे

दितिभावः॥ नन्वेवमपि घुसंज्ञायां पुङ्क्तो बहिरंगतया असिद्धत्वं भविष्यतीति चेन्न॥ तस्या अपि णत्वशास्त्रे कर्वास्यतापन्नतया
पुङ्क्तुल्यत्वात्॥ स्पष्टा चेयं रीतिः अव्ययप्रकरणे शेखरे निरूपयिष्यते चेदं अंतरंगपरिभाषायां॥ नन्वत्र दाबितिप्रतिषे
धापत्तिः॥ न च चर्थेन निर्देशः इति दाधाघ्विति सूत्रभाष्याद्दांतस्य प्रतिषेधो न पांतस्येति वाच्यं॥ पक्षांतरे लक्ष्यासिद्धेरिति
चेन्न॥ अवदातमित्यादिलक्ष्यानुरोधेन औपदेशिकनिर्देशे कृते प्रायोगिके निषेधाप्रवृत्तेः॥ गम्यते बोध्यते इति॥ अस्य
समुदाय इति शेषः॥ ननु प्रनिदारयतीत्यत्र रेफस्य परंपरया दासंबंधित्वात् प्राप्तं दोषं परिहरति॥ यमुद्दिश्येति॥ इदं चेत्थं॥
एतदनिवेशेपि रेफस्य दाशब्दानवयवत्वादेव प्रकृतन्यायाप्रवृत्तेः॥ अथावयवावयवः समुदायावयव इति लोकसिद्ध
न्यायेन तदवयवत्वं अवश्यमाश्रयणीयम् एष न्यायः शास्त्रे॥ अत एव शोरहेरित्यत्र पूर्वरूप आगमे गुणसिद्धिः॥ प्र
छेदक इत्यत्र अंतरंगत्वात् छे चेति तुकि गतिकारकोपपदानामिति स्वरसिद्धिः॥ तुके प्रसक्तत्वादेव दछादयतीत्यत्रेति तुः
ति ऊ इति निघातश्चेति ह्रस्वस्य पितीति सूत्रस्थभाष्यं संगच्छते॥ अन्यथा ह्रस्वावयवत्वेपि समुदायानवयवत्वाद्यदाग
मन्यायाप्रवृत्तौ तदसंगतिरिति चेत् हंत किमेतन्न्यायावलंबनेन वक्तव्यं॥ तुकः समुदायावयवत्वे
पि तमुद्दिश्य विधानाभावेन यदागमन्यायाप्रवृत्तौ गत्यादिग्रहणेनाग्रहणात्॥ तत्साधनाय यमुद्दिश्येत्यस्य परित्या
गे प्रनिदारयतीत्यादौ दोषस्तदवस्थ इति सेयमुभयतस्पाशा रज्जुः॥ यत्तु अवयवावयव इति न्यायः समुदायावयवत्वे

12

नगृहीतस्यावयवविषयकः प्रकृते तु रेफस्यावयवप्रतिपत्तिकाले नाकारस्य दाशब्दावयवत्वप्रतिपत्तिरितिभावः ॥ टयुटयुलोपि
त्वमप्रतापकं ॥ यद्वा शेरते ऐधिषीष्टेत्यादौ रुड्सुड्विधौ उद्देश्यतया परंपरया वा आत्मनेपदे लिङो राम्भयणं दारयतीत्यादौ तु नै
नमित्याहुः ॥ तन्न ॥ सानुबंधकनिर्देशे ओपदेशिकरूपाश्रयणं तस्यैव च टिदादिपदबोध्यत्वं तच्च कार्यासंभवात्तदुपस्था
प्येस्यग्रहणं इत्यनुपदमेवावोचं ॥ एवं च टयुटयुलौ स्फुटः लक्ष्ये टित्पदबोध्योपस्थाप्यत्वेपि टकारनिरूपितावयवत्वस्य तका
रे अभावात् विशिष्टावयवत्वशंकायाः खपुष्पायमाणत्वात् ॥ एतेन पठितावयवेत्यादौ ङीबभावोपि एतस्य योजनामिति
वदंतो निरस्ताः ॥ शीङो रुडिय स्यज्ञादेशस्यातो रुडागमश्र सर्वथैन क्पमपि आत्मनेपदस्यानुद्देश्यतया तद्विषये परं
परेस्फ क्लिर्भ्लमविलसितैव ॥ त्वादेशस्यातः आत्मनेपदसंबंधित्वाव्यभिचारेण आत्मनेपदे विसस्यतत्रासंबंधात् ॥
प्रच्छेदकः दधिच्छादयतीसादेरसंग्रहस्यतदवस्थत्वाच्च ॥ तस्माद्धोके तथादर्शने नैव समुदायावयवत्वेन गृहीतस्यैव
अवयवः इत्यंशं स्वीकृत्य यमुद्दिश्ये संशं परिसज्य प्रदर्शितसकललक्ष्यनिर्वाह इति युक्तमुत्पश्यामः ॥ केचित्तु एधि
षीष्टेसत्रतन्मध्यपातितन्यायेन प्रत्ययावयवत्वात्स्य चसिधिंजयुः ॥ यदपि हल्ङ्यान्तदादेः परस्यापृक्तस्य हलो लोपइ
त्यर्थक हल्ङ्यादिसूत्रस्य सोमस्फदित्यादौ प्रवृत्तिः ॥ गीः कीः इत्यादौ रेफस्य पदांतत्वेन विसर्गः सज्जूः छंभुरित्यत्र तु कि
पदांतत्वाच्छत्वं चेति अवयवावयवन्यायफलान्युदाजह्रुः ॥ तदपि विभ्रममात्रं ॥ आगविशिष्टे यस्माद्विहितस्तदादित्वेनाश्रयोः

सिध्येः॥ अंसेपि नश्चेसस्य नांतस्य पदस्य तुगागमरसर्थेन छत्वस्य निष्प्रसूहत्वादित्याहुः॥ तद्वैयर्थ्यमिति॥ आतोङित इति इत्यादे
शबोधनार्थं तु न तत्॥ तावन्मात्रप्रयोजकत्वे आतोङितरस्कृत्तरं नानस्येयेव ब्रूयात्॥ उत्तरत्र ईदास इति सूत्रे विभक्तिव्यत्य
योपि न कल्प्यते इत्यस्य परं लाघवं॥ नच्चैवमपि सानुनासिके औकारार्थं ▮ तत्॥ नच्चामूशब्दे अकारसावर्ण्याय कंठमात्रस्था
निकत्वातिदेशे तद्विरुद्धं कंप्योष्ठ्यत्वनिवृत्त्या नोकारः तुल्या। युतस्यानिरनुनासिकत्वातिदेशान्नाप्यनुनासिक इति वाच्यं॥ यत्रा
तिदेशस्तद्गतधर्मनिवृत्तावपि आमुआरस्येत्त समुदायगतओष्ठ्यानुनासिकघटकत्वादिधर्माणामनिवृत्तेरिति चेन्न॥ आन
स्याए इति न्यासेपि तत्सिध्येः॥ मात्राकृतलाघवविरहेपि अनुपदोक्तविभक्तिव्यत्ययाकल्पनेन इत्संज्ञालोपाद्यकरणेन ला
घवात्॥ वस्तुतो निर्दिश्यमानपरिभाषासंचारेणाचिंत्यमेतत्॥ यत्तु दीर्घविधौ अक इति पंचम्यंततामाश्रित्य साचानिर्दिश्यमा
नःपरिभाषाप्रवृत्तिमभिदधुः॥ तदपि पूर्वपरयोरिति षष्ठीनिर्देशानालोचनमूलं॥ निर्दिश्यमानयोः पूर्वपरयोरित्यर्थे आग
मसहितस्य न हि तस्माप्तिरस्ति॥ यदागमन्यायसहकारेणैव तत्स्य पूर्वपदबोध्यत्वात्॥ जहारेति॥ यदागमन्यायलब्धस्य त
परत्वेन नमावृत्तिरिति स्पष्टं लटः शानचिति सूत्रे शेखरे॥ यद्यपि संनिपातपरिभाषाविरोधान्नेषदोषः तथापि चकाविसा
ध्यर्थं तदनित्यत्वस्य एतद्विषये आवश्यकत्वादेवमुक्तं॥ आदिना यवी तिइत्यादेर्वधेर्भूयास्तामित्यादेरप्यपरिग्रहः॥ य
तुश्रीणांभ्रूणांमित्यादौ नुडिशिष्टस्याजादित्वात् अचिश्नुधात्विति प्राप्तयोरियङुवङोः परिहार इति। तन्न। यल्लोपेनानि

नर्वीहात्॥दीर्घस्तु नामीतिदीर्घेणसिद्धः॥स्वरोनस्यादिति॥यद्यप्यपरनिमित्तकत्वेनांतरंगत्वात्स्वरएवपूर्वंभविष्यतित
थापितस्यासार्वत्रिकत्वात् आनेशब्दोच्चारणेनमुक्तः प्रतिपदविधित्वाच्चैवमुक्तं।वर्णग्रहणेइति॥नन्वत्रैववर्णग्रहणंअ
प्राधान्येन उतप्राधान्येनेतिविकल्प्यआद्यंदूषयति।आनेमुगिति॥एतेनवक्ष्यमाणःभविष्यतीसाधर्म्येअकारांतोप
दिश्यमानःसर्वआवश्यकः अतएवहलःस्वादेर्नेस्वरः।तथाचनात्रवर्णग्रहणं।एरनेकाचःसस्यप्रसंगयावयवत्वेअचीत्य
र्थः॥नन्वजाहित्वात्तुमित्यार्थस्यप्रत्ययस्ययोःप्रत्ययस्यैवग्रहणमितिपरिभाषयाहतस्वादेर्नदोषइतिवाच्यं॥वक्ष्यमा
णःस्वादेर्दोषाश्चेतिवदंतःसमाहिताः॥जाहिरानुमित्यादौस्वराप्रवृत्तिश्छांदसत्वाद्बोध्या॥प्रत्ययोप्रत्यययोरितिपरिभाषातुनास्त्ये
वेतिस्फुटीभविष्यति॥अंत्यंदूषयति॥किंचेति॥ङमंतेति॥आर्थसिद्धमेतत्॥सूत्रार्थस्तु पदावयवस्यह्रस्वात्परस्यङमोङमुड
जादौपदेह्रस्वेवातोङम्पदावसाग्रेथइतिनभ्रमितव्यं॥वैशिष्ट्यमपिबोध्यतइति॥यद्यपीदंपरिभाषांतरमितिप्रतीयतेतथापि
तद्ग्रहणेनगृह्यतइत्यत्रघटकतयैवस्यानध्याहारेणैतन्मूलकमेवतदितिबोध्यंइतिभावः॥यद्वामुग्विधानेनपूर्वस्यास्वस्या
पिवर्णग्रहणेअप्रवृत्तिर्ज्ञाप्यते॥वर्णग्रहणेपूर्वस्याप्रवृत्तिज्ञापनमात्रेणमुग्वैयर्थ्यापरिहारात्॥वस्तुतःअर्थांतरस्वीका
रेनफलंनापिमानं।भाष्यंत्वेकदेश्युक्तिः॥यत्तुतत्स्वीकारेमिदचोत्यादितिसूत्रभाष्येपरादित्वेदूषणंतपरस्यादेर्मुमोनुस्वाराप
त्तिप्रतिपादनंविरुध्यते॥रामाणामित्यादौपदांतस्येतिणत्वनिषेधानापत्यातदनित्यत्वाश्रयणेमहान्क्लेशइति॥तन्न॥अ
स्वीकृतेप्येतस्मिन्नर्थेसंयोगांतलोपोत्तरंएकदेशविकृतन्यायेनपदत्वादनुस्वारसौलभ्येनतद्विरोधापरिहारात्॥यद

र

पिपदांतभक्तः पदांतग्रहणेन ग्राहिष्यत इति ङमुट्सूत्रस्यायमर्थः॥ यदागमन्यायेनाट्कुप्वाङिति सूत्रेन स्येसनेनङमुट्सहित
स्यैव ग्रहणात् कुर्वन्नास्ते इत्यत्र द्वयोर्नयोर्णत्वंप्राप्तं पदांतस्येसनेन वार्यते॥ द्वयोर्नयोः पदांतत्वेन नकारस्यापि पदांतत्वात्॥ पदां
तस्य पर्याप्त्यधिकरणस्येत्यर्थे तु न मानं फलाभावश्चेति। तदपि न॥ निर्दिश्यमानपरिभाषासंचारेणङमुट्सहितस्याग्रहणा
त्॥ पर्याप्त्यधिकरणस्येत्यौत्सर्गिकत्वेन तत्र मानानपेक्षणात्॥ रामाणामित्यत्र णत्वानापत्तेश्च॥ नचनस्येत्यस्य पदांतविशे
षणतया नकारपर्याप्तपदांतत्वाश्रयेन स्यणत्वनिषेधान्न दोष इति वाच्यं॥ पदांतत्वरूपार्थस्य पदांतपदार्थैकदेशतया
तत्र नकारान्वयासंभवात्॥ तदर्थं कृतव्युत्पत्तिसागे अकृतव्युत्पत्तिकल्पनेन किंचिन्मानं नापि फलं॥ भाष्यलापनमेव फलमि
ति चेत् कृत एव तदर्थं न ग्रैः तावन्मात्रफलकप्रयासः अलमनेन प्रयासेनेत्याहुः॥ गुणवृद्धी अरारावेवेति॥ यत्तु गुणादिसंज्ञा
रेफरहित्ते एव। वर्णग्रहणेउक्तन्यायाप्रवृत्त्यासरेफस्य गुणत्वाभावेपि रेफस्य वचनबोधितावयवत्वसांगेमानाभावेनावयव
रकारांतर्यमादायारारावेवेति नियमोपपत्तेः॥ एतेन रदाभ्यामितिसूत्रस्थभाष्यमपि व्याख्यातमिति। तन्न॥ रेफस्य वचन
बोधितावयवत्वसद्भावेपि गुणपदादिबोध्याकारादेर्मूर्धन्यत्वस्य कथमप्यसंभवात्॥ अंतरतमो गुणो भवतीत्यर्थेन उक्त
नियमानुपपत्तेः॥ पलिचसेटीतिसूत्रभाष्यानुरोधेन प्रकृतभाष्यस्यापि रेफविशिष्टे गुणत्वादिताल्पर्यानवगमाच्च॥ त
स्य हि गुणस्य नेत्यर्थे पेचिपेत्यादौ एत्वाभ्यासलोपमात्रं क्य(?)गुणस्य यो ऽकार इत्येवमेतद्विज्ञायते॥ एवमपि इरा इरि प्येत्यत्र न प्राप्ना
ति गुणस्य यो ऽकारः कथं गुणो भवति वृद्धिर्भवति रेफशिरा गुणवृद्धिसंज्ञकोऽभिनिर्वर्तत इत्युक्तं॥ यदप्याहुः॥ यदागम

न्यायस्यवर्णग्रहणेऽप्रवृत्तौलण्सूत्रस्थभाष्यविरोधः॥तत्राहिपरेणाण्ग्रहणेचिकीर्षतीत्यादौरपरत्वेनेत्वाप्रवृत्तिमाशंक्योपधा
याश्चेतीत्वंभविष्यतीत्युक्तं॥यद्यप्यातुउक्तन्यायेनरपरत्वेऋदंतत्वान्निर्दिश्यमानऋकारस्येत्वेरूपासिद्धेःशंकायाअसंगतिः॥अ
ऋत्ववर्णत्वयोरपिआगमसहितेत्येवसत्वेनसमाधानासंगतिश्च॥अनित्यत्वादुक्तन्यायाप्रवृत्तौदृष्टस्थलेप्रवृत्तेरावश्यकतया
ततएवमातॄणामित्यादौउपधायाश्चेतीत्ववारणेतदर्थंधातुग्रहणस्यावश्यकत्वात्तस्यसंगतिः॥किंचजहर्षेत्यादौगुणेपिअजं
तत्वान्नपायेनाचस्तास्वदितिसूत्रस्थंभाष्यंकारिष्यतेइत्यादौगुणेचिण्वदिटिनस्यादितिस्यसिचूसूत्रस्थंभाष्यंचविरुध्येतेति॥
तदेतत्सर्वंअनित्यत्वाश्रयणेनउपपादयितुंशक्यं॥आगमेसमभिव्याहारेतद्ग्रहणेतेऽपर्यवसितत्वतआप्यधर्माणांअपायेपिगु
णस्ययोऽकारइतिपलिचसेटीतिसूत्रभाष्यपर्यालोचनयातदितरधर्माणामपायेनअ॰ऋत्ववर्णत्वयोरपिआगमसहि
तेएवसत्वेनेत्युक्तिःमातॄणामित्यादौउपधायाश्चेतिइत्ववारणेत्युक्तिश्चमंदमनोहरा॥अलोंत्यपरिभाषानिर्दिश्यमानप
रिभाषयोरेकवाक्यतयानिर्दिश्यमानस्यांत्यस्यइत्वमित्यर्थेनचिकीर्षतीत्यादावित्वाप्राप्त्यावलण्सूत्रस्थभाष्यविरो
धोविभ्रममात्रं॥भावकर्मप्रक्रियास्थशेखरपर्यालोचनयास्यसिचूसूत्रेविषयसप्तमीत्वलाभेनउपदेशग्रहणप्र
योजनप्रतिपादनपरभाष्यस्यैकदेशित्वनिर्णयात्तद्विरोधप्रतिपादनमपितथैवेत्याहुः॥अस्यांशांतपक्रमाह॥अतएवेति॥
सेड्बुधिःकर्तव्येति॥इयरिस्सत्रबहुव्रीहिणाआर्धधातुकेसस्यस्थानषष्ठ्यंततामाश्रयणपरमार्थंतवसूत्रस्थंभाष्यंत्वेक

15

देशफक्तिः॥ किंचतत्पांगीकारेभविष्यतीसादोअनिट्कस्यआद्युदात्तस्यकदाद्युदात्तइकाराद्यादेशःप्रसज्येत॥ स्यबादेशोउपदे
शिवद्वचनंकर्तव्यं॥ केपुनरादेशाउपदेशिवद्वचनंप्रयोजयंति॥ इट्देविलेतित्यप्सूत्रस्थभाष्यउक्ताभिप्रायकमेव॥ इष्टश्चपुनर
तिदेशिकःकरोतिअकेकारादिःइतिसुइट्कासूर्वइतिसूत्रेभाष्येअतिदेशोयदागमन्यायएव॥ निर्दिश्यमानस्येतिपरिभाषा
याअप्राप्त्येति॥ तत्तत्कार्येनिवर्तकतयाप्राप्त्यभावादित्यर्थः॥ स्थानिवत्सूत्रबोधितस्यनिर्दिश्यमानत्वसद्भावादि॰
तिभावः॥ अतएवस्कनोतेःस्यसनोःसोढःपरिस्कंदःप्रान्त्यभरतेषुइत्यादिविधयःअल्लोपोनइतितपरत्वं॥ निष्ठादेशइतिवा
र्तिकेपत्वग्रहणमित्यादिसर्वेसार्थकं॥ इमोलयेत्यादिलक्ष्यनिर्वाहश्च॥ आगमसहितस्यापिबाध्यादेशापत्तेति॥ सिधांतेतुआ
गमरहितस्यैवनिर्दिश्यमानत्वात्तस्यैवपिबादेशप्रवृत्त्यानदोषइतिभावः॥ स्यादेतत्॥ सिधांतेपिनिर्दिश्यमानस्यपिबादेशो
दुर्लभः॥ अर्थवद्ग्रहणपरिभाषाप्रवृत्त्याअर्थवतएवपिबादेशविधानात्॥ आगमसमभिव्याहारेतद्रहितस्यार्थवत्त्वविरहा
त्॥ अतएवस्यसिचूसूत्रेभाष्येकथमिदंविसायभावकर्मणोयेस्यादयःअहोस्वित्भावकर्मवाचिनिपरतोयेस्यादयइति॥ आ
द्येसीयुट्विशेषितःस्यादयोअविशेषिताःसीयुड्विशेषितइत्यर्थःसंगच्छते॥ अन्यथासीयुआगमरहितस्यभावकर्मवाचि
त्वेसत्वेनतदसंगतिः॥ नेमौदाध्यावर्ध्यवंताविविभाष्यमप्यतएवसंगच्छते॥ नचैवमागमरहितस्यार्थवत्वाधभावेधातो
रेधिमटःस्मरेदितिवार्तिकविरोधः॥ लावस्थायामड्इतिसिधांतेअखादीबदित्यादोअतोहलादेरितिवृध्यनापत्तिश्च॥

अ

तत्सूत्रं तु माऽस्त्वियोगे परितार्थत्वमितिवाच्यं ॥ धात्ववयवे अचीसवर्णेन उक्तवार्तिकविरोधपरिहारात् ॥ अतो हल्लादेरिसत्र हल्परत्वमकार
स्येसवर्णेन आदिग्रहणं स्पष्टार्थमिति शेखरोक्तमपास्तदोषस्यापि परिहारात् ॥ ग्रहो लिटीत्यत्र एकाचरसस्य संबंधे अग्रहिष्टामि
त्यत्र दीर्घानापत्तिरितिशेखरस्तु ग्रहेर्विहितत्वेपि एकाचो ग्रहेर्विहितत्वाभावः । एकाच्त्वाभावादितिविशेषणाभावेन मुक्त
विशिष्टाभावबोधतात्पर्यकइतिन तद्विरोधः ॥ उक्तभाष्यप्रामाण्येन निर्दिश्यमानपरिभाषया अर्थवद्ग्रहणपरिभाषाबाधे
राजेः पृथक् भ्राजिग्रहणं व्यर्थं ॥ वानरस्त्राष्ट्रेत्यत्र नरयोरितिरत्वापत्तिश्चेत्ति ॥ उच्यते ॥ परिभाषया अर्थवत्सदोपस्थितावपि अ
र्थवतो निर्दिश्यमानस्येति नान्वयः किंतु अर्थवत्साधारणं यदंगं तदवयवस्य निर्दिश्यमानस्यादेशइत्यर्थेना दोषात् ॥ एतेनोक्त
भाष्यप्रामाण्यात् निर्दिश्यमानपरिभाषाविषये आगमसमभिव्याहारेतद्रहिते तत्त्वस्वीकारः परिहृतइतिदिक् ॥ एरुरित्या
दावित्ति ॥ ननु लोट्संबंधियोरकारस्तदंतस्यादेशइत्यर्थे भवतिरस्यान्योकश्चिदादेशः स्यादितिचेन्न ॥ स्थानेंतरतमपरिभा
षयाशष्टतो ऽर्थतश्च अंतरतआदेशकल्पनेनादोषात् ॥ नसागरइति ॥ एरुरित्यादौ आवश्याद्विविधोपि स्थान्यादेशभाव आश्री
यतेइतिभावः ॥ ननु आनुमानिकस्थान्यादेशभावकल्पने किंमानं । शब्दनियत्वानुपपत्तिरितिचेन्न ॥ बुद्धिविपरिणामक
ल्पनेनापि तदुपपत्तेरितिचेदुच्यते ॥ आदेशग्रहणसामर्थ्यादानुमानिकस्यापि ग्रहणमितिभाष्येण तत्कल्पनादित्याशयादि
त्याहुः ॥ ५ ॥ श्री ॥ नन्वेवं उदस्थादिति ॥ विशिष्टग्रहणे तद्गुणीभूतस्येव बीजत्वेन उद्देश्यतावच्छेदकधर्मस्येवातिदेशइत्यर्थे
मानाभावादितिभावः ॥ नेटीतिलिंगमप्यत एवोपपद्यते । अतएव सर्वेषामिसादौ षत्वसिद्धिः । निर्दिश्यमानस्यादेशाः भवंति ॥

रस

16

पूर्वसवर्णापत्तिरिति ।। अंतरंगत्वात्तिबादिषु राद्देः शित्त इति सूत्रभाष्यरीत्या नियत्वाद्धिकरणे लुङि च अडागमे तदापत्तिः ।। तथा च
रुधां स्कुनुगिति सूत्रे आर्द्रे च मेनं इरसादोः इकारस्य आंतर्यतो दकारे इति भाष्यादन्यो घोषसंवारनादाल्पप्राणत्वांगीकारेण आंतर्य
तो दकारः स्यादिति भावः। नन्वेवं सौ वर्ये सप्तम्यस्तदंतसप्तमीत्वमिति परिभाषया अंगसंज्ञानिमित्तलुङ्[illegible]स्याडागमः स चो
दात्त इत्यर्थेन अटः स्थानमुद्दिश्य विधानाभावात् नायं दोषः। युक्तं चैतत्। अन्यथा लावस्थायामडिति पक्षे अदिद्रूपादि सत्रेनं इर
ति निषेधापत्तिः ।। एवं अधियन् इरस्यानेकाच्त्वाभ्यणापत्तिः। अत एव आउआदीनामिति सूत्रभाष्यव्याख्यानपरसंगतिः ।। अ
न्यथा अस्वपोह सत्ती साध्यर्थधातुग्रहणानुवृत्तौ अस्वपोहसन् इरसत्र व्यधापत्तेरिति चेन्न ।। तस्याः परिभाषायाः श्नसोरल्लोप
इति सूत्रे तपरकरणेन स्वरमात्रविधायके स्वराश्रयकार्यभेदे एव वा प्रवृत्तेरन्यत्र निरूपितत्वात् ।। अदिद्रूपादि सत्र यथा स्वा
रस्येन निर्वाहस्तथाणिच्प्रक्रियात्रोरवरे द्रष्टव्यः। एतत्पक्षे अधियन् इरस्य अनभिधानमेवेति स्पष्टं त्रोरवरे ।। ओरप्येवमत्र
आकुण इसतो आदिसनुवृत्त्या न भाष्यविरोधः। फलं चैतस्य अहन् इरसत्रो धातुरिति निषेधासिद्धिः।। प्रास्थादिसाह्वितादौ सं
हितायाः नित्यत्वसिद्धिरिति दिक् ।। यत्तु उदः स्थास्तंभोरित्यत्र सकारप्रश्लेषेण निर्वाहे नैतत्प्रयोजनमिति तन्न। उष्णिक्
शब्दे विनापीति ष्णिक् शब्दलोपेति छतिरा[illegible]पने पूर्वसवर्णापत्तेः।। आवर्तेत इति।। सूत्रीयेदं षष्ठ्यंतमिति ।। अंतरशब्दः
समीपवर्तिप्रकृतिवचनः। सूत्रे षष्ठी शब्दः तत्सत्तौ लाक्षणिकः।। निर्दिश्यमानमिति चाध्याहार इति भावः।। प्रक्रियारण
[illegible]भेदात्[illegible]स्थानाद्धं निर्दिश्यमानत्यमत आह।। सजातीयमिति ।। ननु भमिदायमिसन्त्रे इदो युपुंसीति विधीयमाने

पादेशः पूर्वरूपादेः स्यापि प्राप्नोतीत्यध्याहृतनिर्दिश्यमानपदे लक्षणया अर्थद्वयमित्याह ॥ अवयवरूपमेव वेति ॥ नन्वेवमर्थ ए
वास्तु । जरायाः इत्यादौ अपदेशवशादेव निर्वाहः । अत एव वार्त्तिकस्वारस्यमिति वाच्यं । जराशब्दे जराशब्दस्यैवादेशापत्तेः ॥ ए
वं च यत्र निर्दिश्यमानबोधकसमुदायोत्तरं स्थानषष्ठी तत्र पूर्वः पक्षः । यत्रावयवषष्ठी तद्विषयोऽपरः पक्ष इति अवस्थाप्ते
देतद्दूषयति ॥ इयं चावयवषष्ठीविषयेऽपीति ॥ स्थाननिरूपितसंबंधेनेति ॥ तथा च जरायाः जरस् इत्यादौ जरान्तादेः स्था
नार्थनिरूपितं प्रतियोगित्वमसक्तं निर्दिश्यमानस्येव तन्निरूपितप्रतियोगितानियामकं षष्ठी स्थाने इति सूत्रमिति भा
वः ॥ तच्चेत्तत्र तत्र निर्दिश्यमानपदाध्याहारेण जरान्ताङ्गस्येत्यादेः वैयधिकरण्येनान्वयेन च संपादनीयमित्याशयेनाह ते
नेदमिति । न प्रतीयमानमिति पाठः । इसर्थ इति पाठे युज्यते इसस्य पूर्वेणान्वयः ॥ अयमर्थः इसस्य शास्त्रो योऽर्थ इसर्थः । इसर्थे
इसस्य चार्थिको योऽर्थ इसर्थः ॥ दीर्घाणामादेशानाभापत्तिरिति ॥ अवर्णान्ताङ्गस्य निर्दिश्यमानस्यास्य स्यैर्थेनापत्तिरिति भा
वः ॥ जातिपक्षे दोषाभावादिति ॥ तत्पक्षे हि जातेः स्वरूपेणानुकरणासंभवात् आन्तरीयकतया तदाक्रान्तयत् किंचित् व्यक्तेः त
तात्पर्यकतया उच्चारणेन तत्तद्व्यक्तिवृत्ति ह्रस्वत्वादिगुणानां अविवक्षणादिति भावः ॥ अत एव एतत्पक्षे ह्रस्वोच्चारणेऽपि ह्र
स्वदीर्घसाधारणतया उपस्थितिः ॥ अच्छन्नौ इत्यादौ ह्रस्व एव उच्चारणीये दीर्घोच्चारणादेव तद्विवक्षेति न दोषः ॥ व्यक्ति
पक्षेऽप्याह । किं चेति ॥ न भूसुधियोरिति निषेधेनेति ॥ न च सुधि भवति कुल तत्कुलं सुभ्रु प्रियं यस्य सुभ्रु एवं तांते प्रियसुभ्रुवः प्रि
यसुधिय इत्यादौ निषेधस्य सार्थक्यं ॥ गतिकारकपूर्वपदस्यैवेति नियमेन तत्र यणो प्राप्तेः ॥ न चासंयोगपूर्वस्ये

संबंध

स्वोच्चारणे

स

17

सादिवत्दिग्वाचकपूर्वशब्देनपंचम्यर्थबहुव्रीहिणागतिकारकयोश्चधातुनिरूपितत्वात्॥गतिकारकपूर्वपदस्येत्यत्रधातोरन्यपदार्थ
त्वेननियमाभावात्स्यादस्यैवयण्प्राप्तिरस्तित्वप्रियसुध्यादौधातोर्गत्यादिपूर्वपदकत्वाभावमितिवाच्यं॥तथात्वेगतिकारकाभ्यामितिवक्त
व्येपूर्वग्रहणेनअवयववाचिपूर्वशब्देनबहुव्रीहिणाअंगस्यैवान्यपदार्थत्वेबोधनेनयणोप्राप्तेःस्पष्टत्वात्॥स्पष्टाचेयंरीतिः
कीतांकरणेतिसूत्रेभाष्ये॥सुधीशब्दादाचारक्विबंतात्कर्तरिक्विप्तुन॥तस्यभाष्येक्वाप्यनुपन्यासेनानभिधानात्॥अत्रवि
धेरेवसापकत्वसंभवेनिषेधपर्यंतंकिमित्यनुधावनमितिचेत्सं॥नचप्रियस्फाधिशब्देप्रियशब्दस्यविनापीतिलोपेवि
धेःसार्थक्यमितिचेत्निषेधोपितद्वीत्यासार्थक्यसंभवादियवेहि॥ग्रहणकशास्त्रगृहीतानामिति।तत्वंचलक्ष्यताव
च्छेदकत्वानार्षत्वेनबोध्यं॥अतएवारिउःरीउः रेफोच्चारणंसार्थकं॥तथाहिगम्लृरस्यनुकरणशब्दात्क्यचिगम्रियतिआ
चारक्विपिलिङिचगम्रियादिसादौरिउःर्थइतिशेखरोक्तं।अन्यथारिगागमेनसिद्ध्यातद्वैयर्थ्यंस्पष्टमेव।ध्याप्रियतेरिसा
दौचपूर्वयणादेशस्यपूर्वमेवप्रवृत्त्यानदोषः॥एतेनरिगागमेनयणासिद्धौरीविधानंचप्रक्रियालाघवायस्पष्टार्थंवो
इतिशेखरोक्तंगम्लृशब्दस्यअनुकरणस्याभिधानेऽदृष्टत्वरंमानांच्चिंत्यमितिअजंतपुल्लिंगप्रकरणोक्तशेखरोक्तंचचिंत्यमि
त्यवधेयं।निर्दिश्यमानकार्यबोधनादिति॥अयंभावः।निर्दिश्यमानत्वंनउच्चार्यमाणसजातीयत्वं।वक्ष्यमाणहयवरट्
सूत्रभाष्यविरोधापत्तेः॥अंतिस्यरसाधुदाहरणपरत्वापादःपदितिसूत्रभाष्यविरोधापत्तेश्च॥नापिउच्चार्यमाणप

धे

दबोधकत्वं॥ सर्वस्थानित्वेनातिप्रसंगापत्तेः। परिभाषावैयर्थ्यापत्तेश्च॥ न च स्वं रूपमिति शास्त्रातिरिक्त एतच्छास्त्रसंकेतग्रा
हक सहकारेणाचार्यमात्र पदबोध्यत्वं तत्त्वं। अस्ति-चोदस्थादिस्थादेशे आर्धधातोट्किता विति सहकारः॥ जराशब्दांते येन विधिस्तदंत
कारश्चेति वाच्यं॥ लिंगविशिष्टपरिभाषाबोधितस्य अनिर्दिश्यमानत्वापत्तौ देवीमंचतीति देवध्र्यङ् इत्यादौ अध्र्यादेशानापत्तेः।
महती प्रिया यस्येति बहुव्रीहौ आन्महत इति आत्वाभावाय लिंगविशिष्टपरिभाषानित्यत्वपरभाष्येण विभक्तौ लिंगविशिष्टाग्र
हणमित्यस्य सखीपत्यादिस्थग्रहणपरभाष्येण च विरोधापत्तेश्च॥ न चायं संकेतः किंतु अतिदेश इति चेत् आर्धधातुकाविति
सूत्रबोधितावयवत्वे बीजभूतयदागमन्याय बोधितधर्मस्यापि अतिदेशत्वाविशेषात्। अत एव समस्करोत्संच
स्कार्षीत् इत्यादौ कीयमाणेपि सुट्कात्पूर्वग्रहणे सुट् अभ्यासयोर्मध्ये प्रवेशयितुं किं कारणं अलिंगेन गोयं क्रियते
करोतिश्च कार्क कारादिः इष्टश्च पुनरतिदेशिकं करोतिः अकंकारादिः इति यदागमेतिन्यायबोधितस्यापि अतिदेशिकत्वप्रतिपा
दनपरस्कट्कात्पूर्व इति सूत्रस्थभाष्यं संगच्छते। न च स्थाने द्विर्वचने संचस्कार्षीत् इत्येतद्विषयकमेव तद्भाष्यमिति वाच्यं॥ त
थासति चकारादिति वक्तव्येऽअककारादिरिति सामान्योक्तेरसंगत्यापत्तेः॥ एवं कजवः संतु पथाः इत्यत्र स्पांस्लुगिति स्
पादेशः स्थवंतस्येव स्यात्॥ किं च संकेतगृहीतस्यानिर्दिश्यमानत्वेन वश्चभ्रस्ज महे इत्यत्र संप्रसारणापत्तिः॥ मम तु तत्रस्थस्थ भिपानि
स्वत्रपसस्थकारादाभिपः पकारं प्रश्लाहारेण तस्थर पामित्येव सिध्येपधाश्रुतस्त्रात् संभावितसमुदायानुबंधानां ना

॥६८॥

वयवावयवत्वज्ञापकादुपपत्तिः॥अन्यथाभवेतमित्यत्रयास्तु इविशिष्टस्यादेशवारणार्थसूत्रस्यावश्यकत्वेन तदसंगतिः॥अतएव
माङित्तिनिर्देशोपपत्तिः॥अन्यथानानुबंधकृतमनेजंतत्वमितिस्वीकारेपि एचोनिर्दिश्यमानत्वेन रज्जुसर्पन्यायेन ऊकारस्याला
पत्तिः॥किंचपरस्मैपदानामितिलुटः प्रथमस्येतिविहितेआदेशाः प्रत्ययांतसमुदायस्यप्रसज्येरन्॥एतन्निषेधसामर्थ्यादि
तिशेखरस्तुअन्याशयेनयोजयिष्यतेइतिनतत्समाधानंप्रयासः॥बभूविथेत्यत्रपरत्वादिटि इविशिष्टस्यवादेशापत्तिश्च॥
एतेनस्वंरूपमितिशास्त्रातिरिक्तग्राहकशास्त्राननुसंधानेकालिकोपस्थितिविषयत्वंतत्वंरस्वेपि परिभाषानिर्वचनंअसं
गतंवेदितव्यं॥अतिस्यरसत्वस्यअसंग्रहापत्तेश्च॥तकारत्वेनतकारत्वस्याविशेषात्॥नचसर्वादिसूत्रभाष्याद्योग्येतरा
न्वितेस्वार्थपदानांशक्तिलोभेनसदादिसंधितकारत्वेनैवरूपेणतकारोपस्थितिग्राहकशास्त्राननुसंधानकालिकेतिनतकारसा
मान्यस्यअतिप्रसक्तिरितिवाच्यं॥सर्वादिसूत्रस्थक्लृप्तमेषांचापिशब्दानामितिभाष्यस्यअपरेत्विसादिनाअन्याशयकत्वेनैवबोध्योते
वर्णनात्॥किंचपूर्वसूत्रेसदादिपदस्यअंगविशेषणतयाक्लृप्तत्वेनअत्रसूत्रेतदोर्विशेषणत्वेमानाभावात्॥यदिचेतंद्रिकृतया
इदंगेवविशेष्यविशेषणभावआश्रीयतेतर्हिनिर्दिश्यमानत्वतानायजातविशेष्यविशेषणभावस्यअग्रेसागायोगात्॥अं
गावयवाः येसदादयः तदवयवयोस्तदोरिसस्यपर्यवसिततयाअतिस्यरसत्रनिर्वाहेतस्यभाष्योदाहरणेऐवकुटारपातः॥
किंचयोग्येतरान्वितेस्वार्थपदानांशक्तिस्वीकारेअंगाभिन्नसदाद्यवयवतदोरेवउपस्थिसापरमसरेतिलक्ष्यस्यानिर्वाहप्रसं
गात्॥एतेनमेनरूपेणप्रयोगघटकतातेनरूपेणउपस्थोप्यचंतत्वंधातुपदाच्चभूवादीनांतेनैवरूपेणउपस्थितिरिसपि
धात्वादीनामितिप्रतीकस्थकेषांचित्प्रतिपादनंनिरस्तमिति॥अत्रब्रूमः॥यच्छब्दघटितशास्त्रासहकारेणषष्ठीप्रकृत्यर्थो

यैमाण्वपदबोध्यत्वंतत्त्वां।एतत्तात्पर्यकृतयैवोक्तंग्रहणंकशास्त्रेसादि।धात्वादीनामनिर्दिष्टत्वादितिग्रंथोप्यतएवस्वरसतःसंगच्छते॥येन
विधिरित्यस्यसंज्ञासूत्रत्वादित्याद्विजराध्यादितिसूत्रशेखरस्थग्रंथस्यएव।एवमानेमुगितिमुग्विधानंयदागमन्यायानित्यत्वज्ञाप
कमित्यपिअसंगतमेवेत्युक्तंप्राक्॥नन्वेवंरूढग्रहणपरिभाषाबोधितत्वात्प्रकृतेसादौविशिष्टस्यत्वबादेशोदुर्वारइतिचेन्न स
यं॥तत्परिभाषाबोधितत्वस्ययथानत्वंतथारूढग्रहणपरिभाषाव्याख्यायांनिरूपयिष्यामः॥वर्हलिहरसमोनुस्वारोपिसुपि
ढःतमित्यत्रयस्माद्विहितंतदसाध्वनुवृत्तेशेखरेएवोक्तेः॥पदशाब्दार्थस्ययच्छब्दघटितशास्त्रबोध्यत्वात्स्थले॥रदाभ्यामितिसूत्रे
रदाभ्यामितिकिमर्थंचरितार्थमुदितं ननुरदाभ्यामिष्टच्यमानेष्वत्रप्राप्नोतिनरदाभ्यांनिष्ठाविशेष्यतेकिंतर्हितकारोविशेष्यतइति
भाष्यंतु।षष्ठ्यंतंस्थानेनयुज्यतेयतःषष्ठीउच्चारितेतिषष्ठीस्थानेइतिसूत्रभाष्योक्तरीत्यात्पालुप्तषष्ठ्यंतेएतत्परिभाषाप्रव
याभिप्रायकमितिनतद्विरोधः॥अथक्रियमाणेपिवितिग्रहणेऽअंत्यस्यकस्मान्नभवतिनिर्दिश्यमानस्यादेशाःभवंतीतिनदोषोभ
वतीतिस्थितिविंशतेरितिसूत्रस्थभाष्यमपि॥नानेनपरिभाषाव्यापारः॥कथ्यतेकिंतर्हितिग्रहणसामर्थ्यादन्त्यस्यैवस्या
नुपस्थानेसर्वस्यलोपोभवतीत्यभिप्रायकमितिकैयटोक्त्यानविरुध्यते॥ननुलिंगविशिष्टपरिभाषाबोधितस्यतत्त्वेस्क
दतीसादौदन्नादेशापत्तिः॥पुनर्ऋपूतुनलक्ष्येलक्षणस्येतिन्यायात्।दन्नादेशेतुनसन्यायःविकारान्यत्वेनलक्ष्यभेदा
दितिचेन्न॥यतोयोविहितस्तद्विशिष्टस्यैवतयाग्रहणेनादोषात्॥यतोयोविहितस्तद्विशिष्टस्यैवग्रहणमितिनियमेमा
नाभावादितिशेषंदुरोखरोक्तंनयुक्तमितिलिंगविशिष्टपरिभाषानिरूपणावसरेनिरूपयिष्यामः॥नन्वेवंसर्वाणीस

नसर्वस्यस्रूपीसाधुदात्तत्वंनप्राप्नोतिरिष्टापत्तौचाभक्तत्वेसर्वोपिज्योतींषीत्यत्रसर्वस्यस्रूपीसाधुदात्तत्वंनप्राप्नोतिरतिमिद
चोंत्यादितिसूत्रेभाष्यविरोधः॥सोवर्यसस्तम्यस्तदंतसप्तम्यइतिपरिभाषयाः स्वराश्रयकार्यभेदेएवप्रवृत्तेः।भीह्रीतिसूत्र
शेस्वरव्याख्यानावसरेनिरूपणादितिचेन्न॥कर्षात्वतइतिसूत्रेंतग्रहणेनस्वरविधौअस्याःप्रवृत्तेस्तत्रैवराद्धंदुशेस्वरेउक्तत्वात्॥धा
त्वादीनामिति।उक्तरूपनिर्दिश्यमानत्वस्यसत्त्वादितिभावः।स्पष्टार्थमिति॥नचनिर्दिश्यमानपरिभाषापेक्षयापरत्वात्साम्नसर्वादेशावा

19

रेणायत्तत्सार्थकमितिवाच्यं॥परिभाषाद्वयोपस्थितौएकवाक्यतयाअन्वयसंभवेबाधस्यायुक्तत्वात्॥तदेतद्ध्वनयति॥अनेकाल्
सूत्रेसर्वश्चेत्यत्रपरिभाषाबोधितएवग्रहणंतत्रइति।नचमातृघसरश्चात्रस्यचिञाचाराधिर्वेतात्वञ्शीर्णिलेङिञ्चमातृघस्त्रीयति
मातृघस्त्रीयातेरस्यादेशेपूर्वेकृकारस्यादेशवारणायङित्वंसार्थकमितिवाच्यं॥परिभाषोपस्थितनिर्दिश्यमानपदेप्रत्ययस्यसा
क्षादेवान्वयेनादोषात्॥अतएवजरायाःजराञ्जरातत्तःस्रूपिनपूर्वस्यजरसादेशः।अतएवतानिकानीत्यादौनत्यदाद्यत्वादि।ल
क्ष्येलक्षणन्यायेननैनिर्वोढुंशक्यमितितन्न्यायमाख्यायांनिरूपयिष्यामः॥विरोधादिति॥अतएवकस्यपितीतिसूत्रेपूर्वो

तत्

त्वेग्रामणिकुलमित्यादौतुकिह्रस्वोनस्यादिशास्त्रांक्यपरादित्वेवैलोपोनप्राप्नोतिरत्याशंक्यानयासमाहितं॥अतएवडउरश्रे
परेइतिसूत्रेभाष्येरेफस्यपरादित्वेजहारेत्यादौओत्वमनयापरिहृतं।श्चोत्तरइतिसूत्रेकैयटेनापिअल्ग्रहणेप्रवृत्तिराश्रिता।
अतएवकारीषगंध्यारस्यादोअणिञोःष्यङादेशासिद्धिः।अतएवलविधौयेत्यत्रविशेषविहितत्वादिनोविषयसप्तम्याच
पूर्वसीयुपिअनयाआदेशासिद्धिराश्रिताआद्युदात्तश्चेतिसूत्रेभाष्ये॥अतएवसायंतनंरौवस्तिकमित्यादावंतरंगत्वात्

तुल्यपि निर्दिश्यमानस्यामादेशादिसिद्धिः॥ न चायन्नादिषु उपदेशावचनेन पूर्वमेवैकादेश इति वाच्यं॥ अतिदूरस्थस्य ढस्यैक इस्य
स्यग्रहे मानाभावात्॥ अत एव ठग्रहणं उक्तोद्धितीयत्वैकविधानार्थमिति भजोदाविति सूत्रस्थभाष्यं संगच्छते॥ एतेन वर्णग्रहणे
इसस्यात्वग्रहणे इस्वर्णात् इदं चिंत्यमिति निरस्तं॥ किंचैतादृशार्थकत्वे तत्पेव वचदेदित्याहुः॥ विरोधाभावादिति॥ निर्दिश्यमानप
रिभाषायाः अलोंत्यस्य आदेः परस्येति परिभाषयोश्चोपस्थितो अतिस्येति लक्ष्यानुरोधेनावयवषष्ठीविषयेपि निर्दिश्यमा
नपदान्वयावश्यकत्वे तथा निर्दिश्यमानस्यादेः निर्दिश्यमानस्यांत्यस्येत्येवं रीत्या एकवाक्यसंभवे बाध्यस्यायुक्तत्वमिति भा
वः॥ तदयोगादिति॥ अंगसंज्ञासूत्रे तस्मिन्निति परिभाषाप्रवृत्तिस्तत्रैकेचित् गुणः कृतां संस्कार इति न्यायस्यापंगी
काराद्विरुध्यते इति भावः॥ अनेकाल्शिति॥ तं ज्वल्को हुरित्यादौ क्षो हरिषष्ठ्या एव स्वीकारात् पद्धतिस्यादौ पाणिनिकृतस्था
न्युच्चारणानुमानात् तेषां व्यवस्थार्थत्वाद्धानदोषः॥ नाभिन्नभंचैत्यत्र सर्वादेशत्वं तु सूत्रेषष्ठ्युच्चारणाभावादलोंत्य
स्येत्यस्याप्रवृत्त्या स्थान्यर्थाभिधानसमर्पस्येवादेशत्वेतिसिद्धांतसिद्धमिति वृद्धिः विवरणे स्पष्टं॥ उदस्थादिति॥ अ
स्मिन् लक्ष्ये इत्यर्थः॥ सूत्रविषये इति॥ उदःस्थे तिसूत्रविषये इत्यर्थः॥ कौस्तुभोक्तं खंडयति॥ यथिति॥ संचारितस्या
दिति॥ अतएवेणेरनिटीत्यस्य णं तागस्य निर्दिश्यमानो योंत्यस्तस्य लोपः परसवर्णमुक्त्वा सत्त्वानेद्विर्वचनेओटिटदित्यादौ णिलो
पो न स्यादित्याशंकितं॥ एकाच्चोद्वे इति सूत्रे भाष्ये॥ किंच अलोंत्य परिभाषायाः षाष्ठेयैकवाक्यतापन्नतया अन्तरस्याश्च
पदैकवाक्यतापन्नतया समकालं प्रवृत्तस्वभावेन बाध्यबाधकत्वस्यैवासंभवः॥ एतेन एरत्तद्बाधकयोरपि एतद्बाध्यपदा

गमन्यायोपजीवनेन उदःस्थादिस्यादौ तयोः प्रवृत्ता एतद्बाध्यत्वमिति कैयटाद्याः परस्येवं वदंतो निरस्ताः॥अकजू विषयेनायंन्यायइति॥
स्थानिवद्भावेनेवेति। यथा स्थानिवत्सूत्रस्य येत्वदाघटितत्वेन तद्बोधितस्य निर्दिश्यमानत्वं तथा तन्मध्यपतितन्यायस्य तद
घटितत्वेन तद्बोधितस्यापि तत्वमिति॥अतएवाभिनइसादौ त्तिपिधातोरितिरूपं वृद्धवंतो विसत्र वत्समभिषिंचती समषवं
चासिध्येति॥अतिदिश्यमानत्वोन्नस्यात्। एतेन तद्भुष्यो कार्यजननं तत्र तत्रनिमित्तय विषये तुल्यमिदयस्य हेतोरापातरमणी
यत्वमिति निरस्तं॥अतएव नल्लोपो नञ इति सूत्रेनल्लोपग्रहणं सार्थकं। अन्यथा अश्वविधानेनैव सिध्येतदसंगतिः।अतए
वकादेशः साकच्चकार्थ इति सदादीनाम इति सूत्रस्थ अश्वचनं साकच्चकार्थमिति इदमोन्वादेश इति सूत्रस्थं च भाष्यं सं
गच्छते। यत्तु अकच्विषये इति प्रतीकमुपादाय साकच्कानपहारके विधावविसर्पः। अत्रमानम। नाप्यक इति सूत्रस्थ अकं
इति प्रतिषेधः॥फलंतु युवकाभ्यामिति सिद्धिः॥तदप•हारके तु उपतिष्ठते एवायंन्यायः।अतएव कुत्सत्वं ष्य इति सूत्रे
भाष्येभिं•धकीसादौ अकचि हित्वाभावात् षित्वं न प्राप्नोतीत्याशंकितं निसाकुत्सनमदं॥किमः क इति विधीयमानका
देशस्य साकच्चके अप्रवृत्त्यापत्तेः॥न चात्र स्यातं सामर्थ्यान्निर्दिश्यमान परिभाषाप्रवृत्त्यानदोषः। परम क इत्यत्र त
दंतस्यापत्तेः॥तथा इदमोन्वादेश इति विधीयमान अश्आदेशः साकच्केन स्यात्॥तत्र विधानसामर्थ्यात् परिभा
षाबाधे अनाभ्यां रात्रिरधीता अनाभ्यां दिनमप्यधीते इत्यत्र सनुक्कस्य आदेशापत्तिः॥एतद्विरोधात् कुत्सत्वं ष्य इति
सूत्रस्थं भाष्यं तु एकदेश्युक्तिः। युवकाभ्यामिति फलोपन्यासोपि अनवधानग्रस्तः॥कुत्सित इति सूत्रे भाष्यटीकाख्या

र्थेपरिपूर्णमितिन्यायेनअकचोबहिरंगत्वेनत्याद्यादेशाप्युत्तरमेवाकच्प्रवृत्तेः।स्यादेतत्।।विभक्तिकार्यापेक्षयाअकचोबहिरं
गत्वेइमकाभ्यामित्यादौअकचः पूर्वंअकेइतिनिषेधाविषयतयाइदल्लोपापत्तिः।।निषेधस्तुअतिइमकाभ्यामित्यादौचरितार्थः।।
किंचइदमोन्वादेशेइतिअशादेशःसाकच्केनस्यात्।।सतुतदंतेचरितार्थः।।तत्सूत्रस्थभाष्यविरोधश्च।।किंचकादेशःसाक
च्कार्थइतिभाष्यासंगतिः।।सूत्रंतुतदंतेचरितार्थं।।किंचअकज्वतःसर्वनामत्वेउपसंख्यानंसर्वकेइतियेनविधिरितिसूत्र
स्थवार्तिकासंगतिः।।अंतरंगत्वेनत्रीभावस्यपूर्वमेवप्रवृत्तेः।किंचएतिकेत्यादौअकचोऽकारस्यस्थानिभूतादचःपूर्वंदृ
ष्टत्वाभावेनस्थानिवत्वाप्राप्त्याआप्परककारस्यसंभवेनकारिकेत्यादौस्थानिवत्वादित्वानापत्तिः।।प्रसयस्थात्पूर्वस्येति
नकेचिद्व्यवधानंतवेवचनाद्भविष्यतिइतिप्रत्ययस्थादितिसूत्रस्थभाष्यासंगतिश्चेति।अत्रब्रूमः।इमकाभ्यामित्या
दौउपसंजनिष्यमाणन्यायेननिषेधरूपबीजस्यस्वातंत्र्येणानिमित्तत्वात्।।अकेइतिनिषेधविषयेपूर्वंहलिलोपप्रवृ
त्तेरदोषात्।अनेनैवोत्वप्रतिषेधःसाकच्कस्यवावत्कव्यइतिअदसऔइतिसूत्रस्थवार्तिकविषयोपिआख्यातः।।इदमो
न्वादेशाद्दसस्यान्वादेशानिमित्तकत्वेनअकजपेक्षयाबहिरंगत्वेनादोषात्।आभ्यामित्यादौलक्ष्यानुरोधेनवाक्यसंस्का
रपक्षस्यैवांगीकारेणप्रतिपदोक्तयोःसूर्वेमशादेशोदीर्घादीनांप्रवृत्यानिर्वाहः।।कादेशःसाकच्कार्थइतिभाष्यमपिआ
वृत्तिकरणात्लक्ष्येलक्षणन्यायबोधनेनपुनःप्रवृत्त्यायोजनीयं।।अकज्वतःसर्वनामत्वेउपसंख्यानंसर्वकेइतिभा
ष्यमपियन्मध्यपतितन्य।तन्यायव्याख्यावसरेयोजयिष्यते।एतिकेत्यादौपंचमीसमासेनस्थानिवत्वप्रवृत्त्यानप्रस

21

यस्थादितिसूत्रभाष्यविरोधः॥नापिलक्ष्यविरोधः।मपर्यंतस्येत्यधिकारः अतियुवकाभ्यामित्यादिसाधनायचरितार्थइतिन
तद्वैयर्थ्येनाकचोंतरंगत्वसाधनंप्रसारा।तथाचसिद्धंविभक्तिकार्यापेक्षयाऽकचोबहिरंगत्वमिति॥अतएवत्वयकावय
कियुवकौआवकामित्यादौविभक्तिनिमित्तत्वाभ्यादेशानांप्रवृत्तिसिद्धिः॥यदितुसदाकीनामहसाध्यनेकविधभाष्यादिस्वारस्ये
नकुत्सितसूत्रभाष्यस्यैकदेशित्वंप्रकल्प्यनाकचोबहिरंगत्वं।त्वयकेत्यादौतुप्रातिपदोक्तत्वात्पूर्वंत्वाभ्यादेशाःइत्यन्येतेतदनु
त्यादिशा।यदुक्तंयुवकाभ्यामित्यत्रापिपूर्वंयुवादेशोपफलदानोसंगतिस्तदेवस्थेवेत्याहुः॥अवेयवषष्ठीविषयेपीति॥तदोरिति
स्थानषष्ठीमादायउपस्थितापरिभाषातत्रफलाभावेनलक्ष्यानुरोधेनचतादृशविषयेणेविश्राम्यतीतिभावः।स्पष्टंचेतत्
उद्योते।अतिस्यइति।अत्रअनंत्यविकारइतिपरिभाषयानिर्वाहः॥इतितत्परिभाषाव्याख्यानावसरेनिरूपयिष्यामः॥७॥
यत्रानेकविध॥गुणप्रमाणेति॥प्रमाणस्वरूपत्वादेर्गुणत्वेपिब्राह्मणवशिष्ठन्यायेनपृथगुक्तिर्गुणशब्देनोक्तत्रितयातिरि
क्तधर्ममात्रं।तेनानांयतर्यमेवएतयोरांतर्यमित्यादिस्थानेंतरतमसूत्रस्थभाष्येणनविरोधः।अंतरतमाभावएवगुणवि
धौऋकाराकारयोःस्थानेयमिलितदर्थः॥तमपूग्रहणमेवेति।ननुस्थान्यतिरिक्तसादृश्याभावेपिस्थानकृतसादृश्येऽ
न्यूनानतिरिक्तत्वरूपातिशयाविवक्षार्थंतमपूग्रहणंसार्थकं॥तेनलाकृतिःहरीणामित्यादौवकारएकाररूपयण्दी
र्घव्यावृत्तिरितिकेयंतदतिरिक्तआंतर्येसत्तागमकंइतिचेन्न॥लोकेनिमंत्रणादिप्रकरणेचैत्रसदृशमानयेत्युक्तेत
स्यसदृशासदृशातमयोःसंभवेसदृशातमानयन्नस्पेवस्वरसतःप्रतीत्याइहापिस्थानिसदृशोक्तोतस्यैवस्थानिसद

शतमस्यैवासिद्धतयातमपग्रहणंव्यर्थंसत्वाक्यभेदबोधनद्वाराअनेकविधआंतर्यसचेतार्थस्यग्राहकमिसाशयात्।।पदन्नितिअ
र्थतआंतर्यवतएवादेशायेनिर्णीतेपदादिभिरादेशैःस्वानुरूपस्थान्याक्षेपासिद्धेर्नान्यथेतिभावः।।समानवर्णइति।।तेन
अंभसशब्दस्यउदन्नादेशेन।तथासतिओजःसहोंभसस्तमसस्तृतीयायाःइत्यलुगापत्तिः।।यत्तुतस्कलंचरणशब्दस्य
नपदादेशइत्ति।तस्यतस्मिन्नपुंसकत्वापत्तिरितितन्न।।पदंव्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्वितिकोशात्नपुंसकपदशा
ब्दस्यादेशेनपुंसकस्यपंदीतिरूपस्यइष्टत्वात्।।किंचतत्समानार्थकरस्फकत्वात्आदेशस्यपुंल्लिंगस्यलोकतःसिद्धस्था
निनःक्लीबत्वायोगात्।एतेनापूशब्दस्यउदन्नादेशस्योक्तरीत्यापत्तिरितिनिरस्तं।।आपःस्त्रीभूम्निवार्वारिइतिकोशेन
बहुत्वेस्त्रीलिंगकअपूशब्दस्यआदेशसमानार्थकत्वाभावेनाक्षेपाभावात्।।यदपिअहोशत्रइत्यत्ररात्रिशब्दस्यनिशादे
शापसाअहर्निशामित्यत्रनिशाशब्दस्यरात्रशब्दत्वेनरूपरात्रीतिरुत्वरात्रान्हाहाःपुंसीतिपुंस्त्वापत्तिरितितन्न।।रूपरात्रेति
अदंतपाठस्यैवशेरवरेसिद्धांतितत्वात्।।एवंपद्दन्निसस्यस्कप्येवप्रवृत्तेःनश्चैरंगीकारादितिदिक्।।तज्वत्क्रोष्टुरितिचेति।
चेनअन्येषामपिसंग्रहः।तेनलुटःप्रथमस्येसप्तएकार्थस्यएकार्थइत्यादिक्रमेणादेशासिद्धिः।।कुमारीश्रमणाकुमारश्रम
णेसत्रबालकादेशेन।।तथासतिकुमारश्चेतिपूर्वपदप्रकृतिस्वरापत्तिः।एवंपत्न्याभार्यायस्येतिबहुव्रीहौपुंवद्भावेनपाच
कभार्येतिन।।तत्रनकोपधायाइत्तिनिषेधेपुंवत्वस्यानिष्टत्वात्।एवंसर्वस्यद्देत्येनेनादेशापक्षेसमानाकारादेशासिद्धिरित्य
न्यत्रविस्तरः।।५।।श्री।।अर्धचक्रहणे।।वधिःस्यादिति।।ननुप्रादूहोढेत्यत्रप्रेष्यगतइत्यादौवधिभावायएषसाहेचर्या

देष्योप्यनभयएवइतिवत्पूर्वोत्तरसाहचर्यात्उढइत्यादेोपिप्रसक्त्यांतएवाश्रीयतेइतिनप्रौढवानिसत्रदोषइतिचेन्न॥उहृअधातोः
क्विबंतात्ऊःसिप्रोहइसत्रउढइत्यादात्गकृप्रसयेउढिकइसत्रेचाप्रसक्त्यांतउहृउढयोःसंभवेनपूर्वोत्तरसाहचर्याऽसंभवात्।
इदमुपलक्षणंलक्ष्यांतेरस्यापि।तेनपढुजातीयायेसत्रविभाषाप्रकरणेतीयस्येयस्याप्रवृत्तिः॥शास्त्रियाविसत्रस्त्रियाइ
तिइयऊोप्रवृत्तिः।पूर्ीहानाविसादेोइन्द्रहन्द्रइसस्याप्रवृत्तिः॥अभीणामिसत्रत्रेस्लयइसस्याप्रवृत्तिश्चसंगस्यते।यत्तुवदंति।अ
श्चेतिसूत्रेराजेःपृथक्भाजिग्रहणंअस्यांज्ञापकंमिति।प्राचोक्तमसंगतं।भ्राम्रदीप्तावितिइगंतस्यविभ्राड्इतिरूपसिद्धेः।वाज्ञ
क्कारांतपाठसामर्थ्येनउभयोर्ग्रहणस्यदुर्वारत्वेनचस्वांशोच्चारितार्थ्याभावात्।अतःटिड्ढेतिसूत्रेअञ्ग्रहणेनसिद्धेठञ्
ग्रहणंज्ञापकमितितन्मंदतरं॥यदुपदेशमादायस्यानुबंधत्वंतस्यतदुपकारकत्वमितिसिद्धांतेनतस्यविभ्रममात्रत्वात्॥
भ्राजइटइसस्यविभ्राड्इतिसिद्धेरिसप्यसंगतं।परमभ्राजइत्यादात्णिजंतात्क्विपिटिलोपेपृथगर्थभ्राजग्रहणस्यावश्यकत्वा
त्॥तस्मादेतत्तदोरितिसूत्रेतद्ग्रहणेनसिद्धेएतद्ग्रहणंज्ञापकं॥नचग्लानःसइसत्रपूर्वसौत्रोपवारणायतच्छद्वार्थगत
संख्याभिधायिनःसोऽसिसर्पावश्यकत्वेननैतद्ग्रहणंअर्थमितिवाच्यं॥प्रसययग्रहणपरिभाषयातदादेरिसकपश्चिसायस्मा
द्विहितस्तदादिर्यस्तच्छद्वं।तेतदनंतरस्यप्रेसासयातादृशस्यसोल्लोपइसर्थेनवैयर्थ्यसंभवात्॥विशिष्टरूपोपादानेइति।तत्वंच
अल्समुदायवृत्तिधर्मबोधकत्वं।इयंवर्णग्रहणेनेति॥अतएवनप्रसक्रधियोरितिनेदमदसोरिसत्रादसशष्देऐसनिषेधश्च
रितार्थः॥ननुपरिभाषास्वीकारेपक्षरिसत्रख्यसादिरुत्वानापत्तिः।सूत्रंतुल्ह्रन्युरिसादेोच्चरितार्थमितिचेन्न॥पक्षुर्नोमत्त

संयोगेइतिनिर्देशेनानर्थकस्यापिग्रहणात्।लाक्षणिकत्वेनलृन्युरित्यत्राप्यव्याप्तिर्चारितार्थ्याभावाच्च।नन्वेवमपिपेचुःकाष्ठैःसख्युः पाकइत्यादौइस्कसोरितिषत्वापत्तिः।धनुष्करोतीत्यत्रानापत्तिश्च॥उणादीनामव्युत्पन्नत्वसिद्धांतेनतस्यानर्थकत्वादितिचेन्न॥ त
निसंसमासइतिसूत्रोदाहरणविषयेप्रातिपदिकसंबंधिनोरेवसंभवेनात्राप्यर्थापेक्षिकोरानुरोधेनतादृशोरेवग्रहणात्॥
॥६५॥ गौणमुख्ययोः॥मृद्गद्गद्गूतइति॥कुगतीतिसमासः।ननुसंघीभवंतिब्राह्मणाइत्यादौवचनमवत्स्वार्थआरोपितसंघाभिन्नब्राह्मणकर्तृकासत्तेत्यादिरूपेणप्रत्ययार्थकर्त्रादौप्रकृतिवाच्चिनएवसाक्षादन्वयस्यावश्यकत्वेनमहद्भूतश्चंद्रइत्यत्रपूर्वोत्तरपदयोःसाक्षादन्वयाभावेनसामानाधिकरण्याभावात्कथमात्त्वशंकेतिचेन्न॥एकार्थविशेष्यकप्रतीतिजनकत्वरूपसामानाधिकरण्यसत्त्वेनादोषात्॥अतएवमहतीसंपन्नामहद्भूतेत्यत्रपुंवद्भावप्रतिपादितोआन्महतइतिसूत्रेभाष्यकैयटयोः॥ईदृशेविषयेसमासोपिलक्ष्यानुरोधात्प्रकृतिद्वारकमात्पाद्येबोध्यः॥गुणादागतइति।गुणहेतुनाज्ञायमानगौत्ववैशिष्ट्यत्वेनज्ञातइत्यर्थः॥अभिप्रेत्याभिन्यायसंग्रहायाह॥अप्रसिद्धश्चेति॥संज्ञादिरपीति॥संज्ञाआदिःप्रथमोयस्यसंज्ञीत्यर्थः।यत्तुसंज्ञाशब्दोऽशआद्यजंतः।तेनआधुनिकसंकेतार्थउच्यते॥आदिपदेनतद्भिन्नः।विलंबोपस्थितिकः।योगिकः।अनुकरणभूतश्च।तेनवातीतिवायुरितियुत्पत्त्यावायुपदेनाश्वादेः।सोमपदेनहिमवदादेश्चनग्रहणंअनुकरणभूतस्यचनग्रहणमितितन्न॥अत्रयप्रसिद्धेरितिन्यायेनमोतेराब्दस्येवयोगिकार्थाग्रहणासिद्धेः॥एवमनुकरणभूतेपिअनुकरणभंगाभियैवतत्तत्कार्यप्रवृत्तेरदोषात्॥तद्गुणारोपादिति॥गुणारोपपूर्वकतद्धर्मादिरोपादित्यर्थः॥बाहीकेतुतद्धर्मारोपमात्रमितिभावः॥मुख्यइति॥शास्त्रत्वादित्वात्पः॥उपात्तंविरि

ष्यार्थोपस्थापकमिति ॥ विशिष्यार्थोपस्थापकं विशिष्टरूपं यस्मिन्शास्त्रे उपात्तमित्यर्थः ॥ विशिष्यार्थोपस्थापकत्वं च प्रयोगस
मवायिपदशक्यतावच्छेदकरूपेण उपस्थितिजनकत्वं । देवताद्वंद्वे चेति सूत्रस्थं देवतापदं अग्नित्वरूपेणैव स्वार्थोपस्थापकं अग्नी
षोमौ माणवकौ इत्युदाहरणपरभाष्यात् ॥ निपातपदस्य च्व्यंतांशे विशिष्यार्थोपस्थापकत्वाभावेपि चार्थद्योतकत्वात् ।
न्यायप्रवृत्तिः सुलभा । न च प्रकृतावारोपेण वर्तमानादेव च्विविधानेन न मुख्यगौणार्थौ संभवत इति न्यायप्रवृत्तिरि
ति वाच्यं ॥ च्विप्रत्ययस्य सर्वापहारिप्रत्ययलक्षणेन निपातपदात् च्व्यंतत्वेन रूपेण गौरसादिस्वरूपस्यैव उपस्थित्या तस्य च
अवस्थाभेदेन गौणमुख्यार्थौ संभवत एवेत्यदोषः इत्याशयात् ॥ विशिष्टरूपमिति ॥ तत्वे च अल् समुदायवृत्तिधर्मबोध
कत्वमित्युक्तं प्राक् ॥ यत्तु निपात एकाजनाङिति अतः अनाङित्युक्तं आङ्भिन्न आङ्सदृशो चादित्वेन चादिनिपातसंज्ञका नामे
वग्रहणं न च्व्यंतस्येत्याहुः ॥ तन्न ॥ आ उ ओ इत्यत्र नाङिति निषेधप्रतिषेधार्थो यमारंभ इति ओत्सूत्रस्थभाष्यविरोधात् ॥ ता
दृशापदकार्य एवेति ॥ अत एव द्राचा महत्पूर्वेति जातिग्रहणमपि मानं ॥ पदकार्ये सत्यपदप्रयोज्यकार्ये इत्यर्थः ॥ तेन युष्मद्युपप
देशस्य संग्रहः ॥ ननु किमिदं पदकार्यत्वं । न तावत्पदोद्देश्यकत्वं ॥ तद्धितविधौ अनुपस्थानापत्तेः ॥ तेषां वस्तुतः सुबंतात्प्र
वृत्तावपि तदनुद्देश्यकत्वात् ॥ नापि वस्तुतः पदसंबंधित्वं । असेहान् महानित्यत्र दीर्घस्यापि तथात्वात् ॥ त्वद्वतीत्यत्र चो
परतः वाच्यादेशानापत्तेश्च ॥ नापि प्रत्ययानिमित्तकत्वं तत् ॥ हरितो दिभ्यो त्र इत्यस्यापि तथात्वेन तत्रेतस्याप्रवृत्तो
गो णोभ्यो पितेभ्यः फक्कापत्तेः ॥ अंगसंज्ञा अनिमित्तकत्वे सति वस्तुतः पदसंबंधिकार्यत्वं तत्वं । त्वे सदृशास्य पुत्रो युष्मत्पु

23

२

नवा

त्वेऽस्मत्प्रत्ययोत्तरपदयोश्चेति त्वमादेशापत्तेः ॥ अत एव युष्मदस्मत्प्रत्ययगोचरयोरिति शारीरकभाष्यप्रयोगे त्वमाद्यादेशो
न कृतः ॥ श्रीमच्छंकरपादैः ॥ अत एव युष्मदस्मदोः षष्ठीति निर्देशः संगच्छते इति चेन्न ॥ स्वरूपोपात्तेति लुप्तनिमित्तभूतप्रत्यय
निमित्तकांगसंज्ञानिमित्तकत्वे सति वस्तुतः पदसंबंधिकार्यत्वामिति न कश्चिद्दोषः ॥ किंच प्रयुक्तामित्युक्ते कर्म निर्दिष्टं कर्ता
क्रिया चानिर्दिष्टे रस्त्विहेति ॥ कर्ता क्रिया च एतदुभयबोधकशब्दस्वरूपे अनिर्दिष्टे अनुच्चारिते रस्यर्थः । इत्यर्थकेनार्थवत्सूत्रभा
ष्येणेति ॥ वस्तुतः गामित्युक्ते कर्म निर्दिष्टं कर्ता क्रिया गुणो चानिर्दिष्टौ प्रयुक्तामित्युक्ते गुणो निर्दिष्टः कर्तृकर्मणी क्रिया चानि
र्दिष्टा इह इदानीं गामभ्याज शुक्लां देवदत्त इति भाष्यपर्यालोचनया अर्थतोऽपि एतद्भाष्यानुवादकत्वं प्रकृतस्य ग्रंथस्य न सं
भवतीति चिंत्यं ॥ अभिव्यक्तपदार्थेति ॥ अभिव्यक्तपदार्था ये स्वतंत्रा लोकविश्रुताः । शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्ति
षु इति हर्युक्तश्लोकस्यार्थः ॥ अभिव्यक्ता इत्यनेन नानार्थ्याभिधायित्वमुक्तं ॥ तेन आधुनिकसंज्ञानिरासः ॥ स्वतंत्रा इत्य
नेन गौणनिरासः ॥ लोकविश्रुता इत्यनेन अप्रयुक्तत्वं निरस्तं ॥ तदुक्तिषु तत्सदृशेष्वित्यर्थः ॥ पदकार्यविषयकमिति ॥ वस्तु
तः आधुनिकसंकेतविषये पदकार्यस्याभावेऽपि तत्कार्यप्रवृत्तये गौणमुख्यन्यायात् प्रयोगे वाभिव्यक्तिन्याय आश्रय
णीयः ॥ अत एव लुगपवाद औश्रमिति अष्टाभ्य औशिति सूत्रस्थभाष्यं संगच्छते ॥ अन्यथा संज्ञाभूत अष्टन्शब्दाज्जसि
शसोर्विषये औश्त्वस्य चारितार्थ्येनापवादकत्वोक्तेरसंगत्यापत्तेः ॥ न च पदस्यैव गौणार्थत्वप्रतीतिः प्रयोक्तुरपीति सिद्धां
तात् । प्रातिपदिकसंस्कारवेलायां अस्यैव मुख्यार्थकत्वमिति वाच्यं ॥ गोपीत्यादौ प्रातिपदिकसंस्कारवेलायां गौणत्व

ग

24

दर्शनात् ।। सर्वोनाम कश्चित्तस्मैसर्वाय देहीति सर्वादिसूत्रस्थभाष्यविरोधाच्च ।। सर्वनामप्रकरणस्थशेखरोप्येवंतुकूलः । त्रा
अत एव बभ्रूरिव बभ्रुभावे समभवेत्तेर इति आत्वंनभवति ।। अत एव संज्ञाभूतेत्रिशब्देत्रेस्त्रय इतिन ।। अप्रसिद्धत्वसंज्ञादिरपि
तद्गुणारोपादेव बुध्यते इति नियमेपि न किंचित् दूषणं मानं ।। वत्कादिप्रभृतिषु एषां दर्शनं गोत्रभावे लौकिके तत्तोन्यत्रतेषांप्र
तिषेधः ।। संबंधिशब्दानां तत्सदृशात्प्रतिषेधः ।। इति बह्वादिभ्यश्चेति सूत्रस्थं वार्तिकद्वयं तत्र तत्र असंज्ञाग्रहणं च एतद
वयुक्तानुवाद इत्यन्यत्र विस्तरः ।। ५ ।। अनिनस्मन्ग्रहणानि ।। वचनरूपेण पठितैषेति । यत्तु न संयोगाद्वमंतादिति निषे
धोऽवेसंतस्येति सूत्रे अर्थवतोरिति पर्युदासस्याश्रयत्वं गमकः । अन्यथा यज्वनो ब्रह्मणः पिंडग्र इत्यादावनर्थकत्वेनैव
व्यावृत्तिसिद्धौ तद्वैयर्थ्यं स्पष्टमेवेति । तन्न ।। अनितेर्विचि अन्शब्देन साकं क्विबंत हम्मशब्देन मधुशब्देन च समासे हम्मनः मध्वन
इत्यादौ निषेधस्य अस्य तेः असतेर्वा क्विपि अर्थवतोरिति पर्युदासस्य सार्थक्यात् ।। वस्तुतोणितिप्रकृतिभावबाधनार्थं कार्मस्ता
च्छील्य इति सूत्रमस्यां ज्ञापकं ।। अन्यथा अर्थवद्ग्रहणपरिभाषयैव प्रकृतिभावाप्राप्त्या नस्तद्धिते इत्यनेनैव तद्वैयर्थ्यं ।। क
र्मशब्दादाचक्षाणण्यंतात् क्विपि विजंत अन्शब्देन समासे तस्य कार्मेति सिध्यर्थं तु न तत् । अभिव्यक्तीतिन्यायेन छात्रादिप्र
युक्तणस्यैव तत्तोप्रवृत्तेः ।। सोर्मनसी अलोमोषसी इति सूत्रे उषसः पर्युदासस्यास्यां मानं । अन्यथा अव्युत्पत्तिपक्षे सूषे
सादौ अनर्थकत्वादेव स्वरव्यावृत्तिसिद्धौ तद्वैयर्थ्यं ।। एनादिविषये अर्थवद्ग्रहणपरिभाषानिरनुबंधकपरिभाषाभ्यां वि
धिवैयर्थ्यापत्त्या द्वयोः परिभाषयोः संयोगेन अनर्थकानामपि ग्रहणसिध्यार्थसिद्धाप्येषा ।। यद्यपि इन शब्दादाचक्षा

पाण्यंतात् ल्किपि इति कंद्रादि असु असूक्ष्म इत्येके असु च अर्थवान् निरनुबंधकश्च संभवति तथापि इतो विलंबोपस्थितिकत्वात् असु
पाठस्य गणे अदर्शनाच्च तद्ग्रहणमित्याहुः ॥ राजेति ॥ अव्युत्पत्तिपक्षे तु तण जंभेति सार्थक्यमिति बोध्यं ॥ दंडीवाग्मी सादौ इन्
हन्निति नियम इति ॥ इदमुपलक्षणं दंडिनौ वाग्मिनावित्यादेः । यथाश्रुते तु सिद्धांते सौ चेति दीर्घस्येष्टत्वेन नां तल्लक्षणे दीर्घे त
दसंगतिः ॥ स्रुप्रप्रा इति ॥ सर्वधातुभ्य इति असुन् । अव्युत्पत्तिपक्षे तु नित्यमसिच् प्रजामेधयोरित्यसिच् प्रसंगे स्रुप्रजा इत्यपि
प्रयोजनं बोध्यं ॥ स्रुस्रौ ता इति ॥ स्रुधातो रौणादिके तसे प्रत्यये अनर्थकोऽस् शब्द इत्यर्थः । सर्वधातुभ्य इत्यसु नि स्रुरीभ्यां तुट्
चेति तुटि निष्पन्ने स्रुस्रोतस् शब्दे तु यदागमन्यायेन तद्ग्रहणेऽस्यास्त्वेन अर्थवानेवास् शब्द इति बोध्यं ॥ अनर्थकोदाहरणं
तु खुरणा इत्यादि बोध्यं ॥ स्रुशर्मा स्रुप्रथिमे इत्यत्र इति ॥ शर्म सुगता स्रुशर्मा प्रथिमा सुगता सुप्रथिमेति विग्रहः ॥ सु बहुशर्म
यस्येति न विग्रहः । अनो बहुव्रीहेरित्यनेनैव सिद्धेः ॥ यद्यपि सुप्रथिमेत्यत्र अनुपधालोपिन पाक्षिक ङीषभावार्थम् अन इत्यस्य म
इति रावश्यकं तथा सुशर्मेत्यादौ नसे योगादिति निषेधेन अनउपधालोपिन इत्यस्याप्राप्त्याऽनो बहुव्रीहेरित्यनेन निर्वाहस्तद
वस्थ एव तस्मादुक्त एव विग्रहः ॥ न च उक्तविग्रहे समासानापत्तिः कर्मप्रवचनीयानां प्रतिषेध इति वार्तिकप्रसाख्यानपेरस्व
ती पूजायामेवेति नियमेन कुगतीत्यस्याप्राप्तेरिति चेन्न ॥ अतिमाल इत्यादौ क्रांताद्यर्थे समासानापत्तेः स्वती पूजायामेवेत्यस्य
एकदेशयुक्तिकत्वात् ॥ कर्मप्रवचनीयानां प्रतिषेध इति वार्तिकारंभस्यैव ज्यायस्त्वात् । सुपुरुष इत्यादौ सुः पूजायामिति सोः कर्मप्र
वचनीयत्वेपि कर्मप्रवचनीयानामिति प्रतिषेधस्तु न तस्य कर्मप्रवचनीयत्वे निमित्तं विभक्त्यंतेन समासे एव निषेधप्रवृत्तेः ॥
यद्वा शर्मणा शोभन इति विग्रहः ॥ एवं च सोः पूजार्थकत्वेन नियमांगीकारेपि न दोषः ॥ अत एव अतिरती सन्नरो रवरे देवेभ्यः अधि

२५

कः पूज्यइसर्थे॥ अतिदेवानिसादौ अनभिधानान्नसमासइस्कक्रमिसाकुः॥ परिवेविषीध्वमिति॥ जोहोत्यादिकस्यविवेरिदं॥ अत्रचषांत
मंगमितिभावः॥ अंगग्रहणादिति॥ यद्यपिअतिपूर्वकादसधातोः सार्वधातुकेलिङि अतिषीध्वमित्सत्रतासस्त्योरितिलोपंबाधि
त्वानिसत्वात्लिङः सलोपेसात्यदाद्योरितिनिषेधंबाधित्वाउपसर्गप्रादुर्भ्यामितिषत्वेसार्थकः षीध्वम्संभवतितथापिषत्वस्या
सिद्धत्वेनतदसंभवइतिभावः॥ सूत्रंतुसिधआदेशप्रसयोरितिषत्वेचरितार्थं॥ नचैवमपिएधिषीध्वंबुभुधिध्वेइसादौअ
र्थवत्षीध्वमादीनांसंभवात्तत्रामवृत्सर्थेचेरितार्थअंगग्रहणमितिवाच्यं॥ इणइसस्यषीध्वमादावेवान्वयेनतस्यचनोर्थवत्त्व
मिसाशयात्॥ अनर्थकस्यैवषीध्वमः संभवादिति॥ यद्यपिइटः षीध्वमावयवत्वात्तस्यततः परत्वंहदुरुपपादंतथापिश्रुति
कृतोनंतर्यमात्रेणशास्त्रप्रवृत्तिरितिबोध्यं॥ नचविभाषेटइसत्रइटः प्राधान्येनषीध्वमोवयवधकारेएवान्वयेनअस्सेवा
र्थवत्षीध्वमः संभवः नाप्राप्तिन्यायेनषीकारव्यवधानंसत्वेतेइतिवाच्यं॥ तुल्यरीसाइणः षीध्वमित्सत्रापिधकाराविशे
षणत्वापत्याएधिषीध्वमित्यादौढत्ववारणायतत्स्याधश्यकत्वात्॥ ५॥ एकयोगनिर्दिष्टानां॰॥ अनंतरत्वादिति॥ आक्ष॥ कांक्षामूलक
स्वरितत्वप्रतिज्ञायास्तावदंशोएवांगीकारेणाकांक्षानिवृत्तेरितिभावः॥ ओकइति॥ यथाजंतूत्पादनायसमुद्यतयोः सोमकृतस्तु
रोहितयोर्मध्येपुरोहितंसनरकपातेसोमकस्यापिनरकेप्रवृत्तिः स्वर्गान्निवृत्तिरिस्फपारव्यायते॥ ज्ञापकानिचौलिङसिचा मे
विसतः सिज्ग्रहणानुवृत्त्यैवसिद्धेहनः सिच्इतिसूत्रेसिच्ग्रहणं॥ किमिदंभ्यामिसतः किम्ग्रहणानुवृत्त्यैवसिद्धेइदमोनिवृत्त्यर्थं
क्रिमेः संख्येतिसूत्रेकिम्ग्रहणं॥ एवमिच्कोरित्यतोइण्ग्रहणानुवृत्त्यैवसिद्धेकुग्रहणनिवृत्यर्थंइणः षीध्वमित्यत्रइण्ग्रहणं॥
कुग्रहणानुवृत्तौहिपध्वीध्वमित्यत्रमूर्धन्यापत्तिः॥ एवंनाभ्यस्तस्याचीत्यतः सार्वधातुकग्रहणानुवृत्त्यैवसिद्धेपिनिवृत्यर्थं

तुरुस्तुशाम्यमीतिसूत्रेसार्वधातुकग्रहणं॥चिण्तेपदइत्यत्र तःचिण्पदानुवृत्त्यैवसिद्धेनरुधइतिनिषेधानुवृत्तयेचिण्भावकर्मणोरितिचि
ण्ग्रहणं।तस्यनिमित्तेइत्यत्र तःतस्येत्यनुवृत्त्यैवसिद्धेनिमित्तग्रहणनिवृत्त्यर्थंतस्येश्वरइत्यत्र तस्यग्रहणं।अधिशीङ्इत्यत्र तःकर्मग्रहणेअनु
वर्तमानेआधारनिवृत्त्यर्थंकर्तुरीप्सिततेतिसूत्रेकर्तुरुपादानमितियत्किंचिदेतत्॥यत्तुस्तुवामंत्रेइत्यत्र तःस्तुभिनुवर्त्तमानेअव्य
यग्रहणाननुवृत्त्यर्थंकृतंस्तूप्रतिनामाग्रार्थइतिस्तूग्रहणंतापदमिति।तन्न।अव्ययंविभक्तीत्यत्र तःप्राक्पाठेनैवनिर्वाहेस्तूग्र
हणस्यस्पष्टार्थत्वात्॥नेरस्यासंबंधार्थमिति॥नेरनुवृत्तौइष्टोविध्यभावेननिषेधवैयर्थ्यान्नेरस्यासंबंधेसिद्धेरयुक्तमेतत्॥
गुणरूपविकारस्येति।ननुगुणबाधवत्तुविनिगमनाविरहेणविकारांतरस्यापिबाधेआतीदिसादोसवर्णदीर्घानापत्तिः॥न
चसिज्लोपएकादेशोइतिवार्तिकवैयर्थ्यान्नबाधः।समानार्तेयम्न्यारितार्थ्येतुन।प्रसासासिज्लोपनिमित्तकेएवतत्प्रवृत्तेरिति
वाच्यं।अग्रहीदित्यत्रग्रहोलिटीतिसामर्थ्यात्दीर्घेततःसवर्णदीर्घप्रवृत्त्यर्थंतत्चारितार्थ्यात्॥नच।ग्राहिष्यतेरसादो।चिण्व
दिडूषयेदीर्घेश्चरितार्थइतिवाच्यं॥प्रकृतस्यवलादिलक्षणइटएवदीर्घप्रवृत्तेः॥किंचपिपठीरित्यत्रहलेइतिदीर्घोपिनस्या
त्इतिचेत्सत्यं॥ग्रहोलिटीटिदीर्घइतिदीर्घविधानसामर्थ्येनसामान्यतएवगुणातिरिक्तविकारबाधाभावेआपेनान्नदोषइत्याशयात्॥
प्रत्याख्यानस्यायुक्तत्वादिति॥ननुप्रत्याख्यानापेक्षयापृथक्योगकरणस्यैववायुक्तत्वंदृश्यते॥पदयोर[illegible]वाध्योगविभागोगरीयात्॥ यानिति
किंचपृथग्योगकरणेइट्पदेनआगमस्यैवग्रहणंनधातोरित्यर्थलाभायव्याख्यानस्वीकारक्लेशश्चेतिचेन्न॥पुनरिड्विधानेनवलादिल
क्षणइटोगुणाभावेपिचिण्वदिटिदायितेसादोगुणाभावायपृथक्योगस्यावश्यकत्वेनफलमुखगौरवस्यादोषत्वात्।तथोक्तत्रो
हेतुताच्छील्यानुलोम्येषुइत्यत्रप्रसिद्धतरत्वात्करोतेरेवग्रहणंनलेकानुबंधकस्यापिकृञ्हिंसायामित्यस्येतिबोधिन्युक्तेर्दि

शाआगमस्यैवग्रहणमित्यर्थे कश्चित्कृशोपि नेत्यन्यत्र विस्तरः ॥५॥ संनियोगशिष्टानां ॥ कैयटइति अत्राहचिबीजं तु ओतो मशासोरिति सूत्र
भाष्यविरोधः ॥ तत्र हि ओतस्ति ङ् प्रतिषेध इति वार्तिकप्रत्याख्यानाय वा सुप्यापिशलेरित्यतः सुपीत्यनुवर्तते वेति निवृत्तमिति सिद्धां
त्तिनाभिहिते पूर्वपक्षिणा पूर्वन्यायमादायकल्पं पुनरेकयोगनिर्दिष्टानां एकदेशोनुवर्तते एकदेशो नेति शंकिते वेदैकयोगनिर्दिष्टा
नामेकदेशोप्यनुवर्तते । यथा अलुगुत्तरपदे अलुगधिकारः प्रागानङः उत्तरपदाधिकारः प्रागंगाधिकारादिति द्वितीयन्यायमादाय
समाहितं ॥ तावन्मात्रांशे इति ॥ संख्याव्ययादेरित्यादौ संख्यापदे स्वरितत्वं प्रतिज्ञायपुनरादिपदे प्रतिज्ञानमेतन्मूलं । नन्वलुगधि
कारः प्रागानङः उत्तरपदाधिकारस्त्वापादपरिसमाप्तेरित्यनुक्त्वा प्रागंगाधिकारादित्ययुक्तं । हृदयस्येत्यादिसूत्रे तदधिकारे यत्वेउ
त्तरपदे इत्यर्थापत्तौ एः साधुः यः हृदयस्य यः हृदयः इत्यादावेवम्प्रवृत्तिः स्यान्नतु हृद्यमित्यादाविति चेन्न ॥ लेखयग्रहणेन तत्रोत्तर
पदाधिकारएव बाध्यते इत्यस्य वक्ष्यमाणत्वात् । नन्वेवमपि वोढेत्यत्र सहिवहोरिति वोत्वानापत्तिः ॥ सूत्रं तु मध्यवोढ् ढौ कृते सा
दोचरितार्थं स्यात् । न च तत्र ढो ढे लोपस्यासिद्धत्वेन पूर्वं जश्त्वे ढो ढे लोपाप्राप्त्या नचरितार्थ्यं ॥ ढो ढे लोपविधानसामर्थ्येन
स्वढसाधुत्वस्यासिद्धत्वाभावकल्पनापेक्षयास्यास्मिन्जश्त्वे दृष्टासिद्धत्वकल्पने जश्त्वाप्रवृत्तिरूपस्यागल्ल । बाधापत्तेरिति वाच्यं ॥
अत्रापि उत्तरपदाधिकारे बाधापत्तेस्तुल्यत्वात् । किं च मतौ चेयतीत्यत्र चोविति दीर्घानापत्तिः ॥ उपसर्गसमा॰ नाकारमित्यनेनजा
तनिवृत्तेः शेखरे प्रतिपादनात् ॥ अतएवसुमनाय्येत्यादौत्यप् ॥ प्रातिअचिचादित्यत्र प्रकृतिभावश्चासिध्यति । अन्यथा ओ च्येभ
व्ययपूर्वपदत्वेन तत्समासाभावात्तदनापत्तिः ॥ अंसेन समासे इति निषेधश्च आपद्येत । न च चावित्यस्य उत्तरपदविशेषणत्वेन धा
तुग्रहणे तदादिविधिरिति परिभाषया चादावुत्तरपदे इत्यर्थात् दीर्घः सुलभ इति वाच्यं ॥ अलुगुत्तरपदे इत्यत्र पदे इत्येवासिद्धेउत्तरग्र
हणेन उत्तरपदस्य शब्दस्य चरमावयवे एव वरूढेः शेखरे प्रतिपादनात् ॥ उच्यते । सोढ इति निर्देशेन ढूलोपे पूर्वस्य दीर्घोणः इति सूत्रे पू

२६

दि

वेग्रहणेन च मंडूकप्लुतिस्वीकारेणादोषाद्रसात्रयात् ॥५॥ भाव्यमानेन ॥ अप्रसज्यद्रसनेनेति ॥ योगविभागपूर्वकं अप्रसज्यद्रसने
ननिषेधेन सूत्रांदिप्राप्तेनेसवर्णेन्यथः ॥ तत्रहेतुमाह ॥ सामर्थ्यादिति ॥ ज्ञापयतीति ॥ तंत्रांतरसिद्धपरिभाषायाः भाव्यमानेप्रस
यांशोस्वसंमतत्वबोधनद्वाराअंशांतरेपिस्वसंमतत्वं बोधयतीत्यर्थः ॥ ज्ञापकमिति ॥ ननु लोपेनासिद्धेअकारविधानसामर्थ्यात्परह
पंबाधित्वा दीर्घरूपसिध्यानादृविधानस्य स्वस्मिन्नचारितार्थ्यमिति चेन्न ॥ अकृत्सार्वधातुकेति दीर्घे आदयसाचारितार्थ्यसंभवेन प
ररूपापत्तेः ॥६॥ भाव्यमानोप्यु ॥ दीर्घविधानंस्यादिति । समाहारद्वंद्वेन तु न निर्वाहः ॥ उश्च उश्चेति द्वंद्वे सुलोपे घ्यंतत्वाध्रस्वस्य
पूर्वनिपातेन पुंसकह्रस्वसवर्णदीर्घयोः प्राप्तयोः दीर्घस्य शब्दांतरप्राप्त्याअनित्यत्वेननिमित्तादपरनिमित्तकत्वेनांतरंगत्वाच्च ह्रस्वे ततः स
वर्णदीर्घेलक्ष्येलक्षणन्यायेन पुनर्ह्रस्वाप्राप्त्या उ इति रूपासिद्धिः ॥ अतउकाल इत्यत्र उकाले इति न कृतमिति भावः ॥ दिव उदिति ॥ ननुअ
र्धमात्रिकव्यंजनस्य ईषत्सदृशस्य उने कविमात्रिकोकारेपि दीर्घप्राप्तेः स्वस्मिन्नचारितार्थ्याभावात् कथं ज्ञापकमिति चेन्न ॥ अश्चेति
सूत्रे छग्रहणाकरणलाघवेन छोरिति सूत्रे क्विती यन्ननुवर्ततो धुभ्यामित्यादावूठि ह्रस्वश्रवणार्थतचारितार्थ्यात् ॥ सूर्वदिव उदित्यस्याप्रा
प्तिः ॥ अंगत्वात्स्थली[illegible]स्य विषयसप्तमीत्वाच्च पूर्वमेवोठः प्रवृत्तेः ॥ ननु तद्भावितपक्षाश्रयणात् धुभ्यामित्येवं ऊरिति दीर्घो
प्रवृत्तावपि ध्येयत्सादौ वाविति दीर्घप्रवृत्त्यर्थं तपरत्वमावश्यकं ॥ यथा कुरुतत्र इत्यत्र उदितितपरत्वाद्गुणाभावः ॥ उक्तं स्थानिवत्सू
त्रे भाष्ये ॥ अत एव वर्चे वृत्तौ सादौ उदिति तपरे त्वसामर्थ्यान्नगुण इत्युक्तं च धेरिति चेन्न ॥ अशब्दार्थत्वात् ॥ समकालत्वावृत्तेरेवो
तपरसूत्रेण शब्दमर्यादयालाभात् ॥ दीर्घादीनां बहिरंगत्वात्तेनप्राप्तेरसत्त्वाच्च ॥ उदोष्ठ्यपूर्वस्येत्यत्रापि पूर्वेत इतिविभ
क्तिभेदसूत्रे भाष्यप्रयोगाच्च ॥ अत एव चिकीर्षतीत्यादौ ह्रस्वेदीर्घसिद्धिः ॥ स्थानिवत्सूत्रस्थभाष्ये वैकदेशवृत्तिः ॥ कुरुतत्र इत्यादौ
अंतरंगपरिभाषयापि गुणवारणासिद्धेः ॥ क्वितीत्यनुवृत्तिपक्षेप्याह ॥ ऋत उदिति ॥ दिवशब्दादाचेप्सायां णिच्यतात्त्वं क्विपि अनुव

त्तिपक्षेप्यूठि-चारितार्थ्यं ■तुन।अभिव्यक्तीतिन्यायेनतस्याग्रहणात्॥नचकृतउदितित्तपरत्वेदूलोपइतिदीर्घवारणार्थमितिवाच्यं।■दत्तो
त्तरत्वात्॥स्फुपत्रवाजिताबाणाःज्वलिताइवपन्नगाः।नैकृतोरस्यप्रासंतसविसूरस्मयोयथेतिरामायणप्रयोगाविरोधापत्तेश्च।उर
श्रपरेइसन्नाप्यग्रहणाभावेडुरपरइतितसूत्रस्थभाष्यविरोधाच्च।धर्मियाहकमानाश्चेषाआगमविषयेएव।तेनसनाद्यं।सभि
क्षउःतनादिकृञ्भ्यउइसादौनदोषः॥यथेष्यनभिधानाद्दीर्घग्रहणंनभविष्यतीतिअणुदित्सूत्रस्थभाष्यान्नदोषः■तथापि
लक्षणेकचस्कृष्कानस्मदादीनुभ्रातिप्रवृत्तमितिध्येयं॥नन्वेवंडुदुपधायागोहइतिसूत्रेउदुपधायाइतिवत्क्ष्वेदीर्घनिर्देशोव्यर्थ
इतिचेन्न॥दोषोणावितिसूत्रेविकृतनिर्देशस्यप्रसाख्यातत्वेनदूषयतीत्यार्थ्येर्थतस्यावश्यकत्वात्॥नचप्रसाख्यानेनवकुंशक्यं॥
क्विबंतादुषेराचक्षाणपिचिडुत्वापत्तेः॥इदुपधेभ्योणिचोऽ।नेभिधानंलुङ्येवेतिवाच्यं॥धातोःभक्तार्थमुच्यमानेमितिपरिभाषया
आचक्षाणाणिचितदप्रवृत्तेः।नेचदुषेस्क्तावपिपरत्वाद्गुणेआंतरत्तम्याद्दीर्घेसिध्यंदूषयतीतिवाच्यं॥तत्कन्यायेनगुणाप्रवृत्तेः॥उ
त्वस्यगुणबाधेनसार्थक्यात्।नचतावन्माऽप्रयोजकत्वेदीधीवेवीटामित्स्कृतरंदुबोणोवाच्चित्तविरागेइतिसूत्रपाठेनेवसिध्याउ
दोदेशाविधानवैयर्थ्यमितिवाच्यं॥मितांरुस्वइसादौणिपदस्यअनुवृत्तसनोपत्तेः॥एतेनगुहेर्व्येताञ्चउःगुणेउत्वेचणोचङीतिरु
स्वाप्रवृत्तसर्पैतत्॥ऊदुतइतिसूत्रेदीर्घनिर्देशावैयर्थ्यात्प्रश्लेषेणपुनर्विधानात्॥अलबेधूरिसत्रकबूनिवृत्तसर्पैवत्॥अतए
वउदुपधायाइतिसूत्रेउ ऊं इतिप्रश्लेषेणाविकृतनिर्देशो।भाष्यकृताप्रसाख्यातः।अजुगूदिसाध्येर्थप्रश्लेषस्यावश्यकत्वात्॥
नचउत्वदृष्याणोचङीतिरुस्वस्यबहिरंगत्तयाअसिद्धत्वेनबाधासंभवइतिवाच्यं॥ऊइतिदीर्घोच्चारणसामर्थ्येनउत्केभाष्य
बलेनचबबहिरंगस्याप्युपधात्वनिमित्तकरुस्वस्यबाधकत्वादित्तिपरास्तं॥विकृतनिर्देशाप्रसाख्यानपरतसूत्रस्थभाष्येण
रुस्वघटितरूपस्येयललभाच्चा॥नहितसक्तेसामर्थ्यंवकुंशक्यं॥तत्कन्यायेनगुणबाधापसागूहयतीतिदीर्घोकारादेशार्थं

प्रश्लेषसार्वण्यात्॥कृते तु प्रश्लेषे तत्सामर्थ्येन तत्र न्यायानित्यत्वबोधनद्वारा गुणप्रवृत्त्युत्तरं तत्प्रवृत्तिबोधनमित्यन्यत्॥एतेन उ
दिति दीर्घप्रश्लेषेण गोहइति विकृतनिर्देशप्रसाख्यानेन विशेषोयमित्यपास्तं॥ननु उक्तोलइति वेदीर्घे निर्देशो न सिध्याव्यर्थ्येयमि
ति चेन्न॥दीर्घस्येव विधानापत्तेः॥तत्र प्रत्याख्यानेन प्रश्लेषस्वीकारापेक्षया परिभाषारंभस्यैवौचित्यमित्याशयादित्याहुः॥५॥
वर्णाश्रयेनास्ति॥अवादेशाद्यापत्तिरिति॥तथा च उक्तोंऽतरंगकार्ये निमित्तविनाशकत्वाभावेनांतरंगानेपीत्यस्यावृत्त्याअंतरंग
त्वात्पूर्वमेवावाद्यादेशापत्तिः॥तथा च गाहितमिति रूपापत्तिरिति भावः॥ननु अंतरंगानपीति परिभाषया रसंज्ञालोपतः पूर्वं
ऊॆप्रत्ययलुकि न दोषः॥अत एव हरिङ्अधिरयल्ङो किकं प्रक्रियावाक्यमित्युक्तं वक्ष्ये॥अवादेश इत्यापि रूपफलसत्वान्नयमप्रवृ
त्तिप्रवेतिभ्यां फले विशेषस्तत्रैव तत्स्वरतिरिति समासशेषस्वरोत्कसमाधिप्रसोशेति चेन्न॥ रकोपीसज्ञाग्रहणेन प्रकृतिनि
मित्तके विधीनामेव तत्परिभाषाबोधबोधनात्॥अन्यथा तेनेन लुमते यस्या नित्यत्वबोधनेपि सोः विभक्तित्वाभावादे
वनुमोप्राप्त्यात्तदसंगतिः॥रसंज्ञालोपयो विभक्त्यादिसंज्ञानां च प्रकृत्यनपेक्षणान्न दोषः॥एतेन सामंत्रितमिति सूत्रेतद
तमिति मतीकमुपादाय अत एव हे हे भो रस्यादीनां संज्ञासिद्धिः॥अन्यथा अंतरंगानपीति न्यायेन नखनिर्भिन्नरसादिवत्
संज्ञा न स्यादिति नव्योक्तं निरस्तं॥अत एव दधतीति सूत्रे तेतिक्ते इति किं निपासते आमने पदं नैतदस्ति अनुदात्तङितेरसेव
सिद्धं नियमार्थं तर्हि भविष्यतीत्युक्तं भाष्ये॥अत एव रसंदघटितेत्यादि परिभाषाशापरेन परसंज्ञायामुपमानमिति सूत्रस्थ
भाष्यं संगच्छते॥सोहि गर्गाइत्यादो आधुदात्तत्वाभावाय अन्यथा ताभ्यां पूर्वं यञो लुकि निस्वरप्राप्त्यात्तदसंगतिः॥अत
एव न पदांतसूत्रे पंचेंद्राण्यो देवता अस्य पंचेंद्र इति लुकि न स्थानिवदित्यस्य प्रयोजनमुक्तं भाष्ये॥ताभ्यां पूर्वं लुकि प्रवृत्तौ तद
संगतिः स्पष्टैव॥फलं चास्य जंबू राध्दादो रत्नेतस्य फले लुगिति लुकि जेतरप्राप्तत्वस्यादिसंज्ञासिद्धिः॥प्रियतिस्त्र पोइत्ता

२०

देतिसादेशस्य च सिद्धिः ॥ अन्यथा पूर्वसो लुकि तस्य विभक्तित्वसंबुद्धित्वाभावेन तदसिद्धिः । यत्तु विदाङ्सादो अन्त्येति विहितस्याओ यत्र
ओश्चेति प्रत्ययलक्षणे । नञिदंतत्वात् तत्तो युवार्थ विहितस्य ङ्ओण्यस्त्रियेति लुक् सिद्धिः फलं गोत्रे लुगचीति तु न लुक्षापहारे वि
षयत्वाभावादिति । तन्न ॥ प्रत्ययलक्षणेन विषयत्वसत्त्वादिति स्पष्टं गोत्रे लुगचीत्यत्र भाष्ये निरूपयिष्यते चेदमुपरिष्टात् । एतेनां
तरंगो न पीतिन्यायेन गवे हितमित्यर्थे गोहितमित्यस्य निर्वाहः इति चेत् गवां हितमिति विग्रहो बोध्य इति निरस्तं । हितयोगे चेति च
तुर्थ्या एव तत्र प्राप्तेश्च । चतुर्थी चाशिष्येत्यनेन न षष्ठ्याविधानेपि उभयोरपि क्रियान्वयेन परस्परमसामर्थ्यात् समासाभावस्य
तत्सूत्रे शेखरे एवोक्तत्वाच्च ॥ नन्वेवमपि न लुमतेति निषेधान्न तदापत्तिः । तस्य लुप्तप्रत्ययनिमित्तकांगोद्देश्यक एव प्रवृत्तेः ॥ अत ए
व उक्तमेस्यादौ क्रमः पपरस्मैपदे ति दीर्घसिद्धिः ॥ तस्य परस्मैपदपरकशिन्निरूपितांगोद्देश्यत्वेपि लुप्तपरस्मैपदनिरूपितांगोद्दे
श्यत्वाभावात् । अवादेशस्य च एचोद्देश्यत्वेपि अंगोद्देश्यत्वाभावात् न दोषः ॥ नन्वेवमपि तस्मिन्निति परिभाषैकवाक्यतया वादेशस्य
उच्चार्यमाणअच्बुद्धिनिमित्तकत्वेन तादृशबुद्धेरतिदेशमशक्यत्वेन कथं तत्प्राप्तिः । अत एव न स्वनिर्भिन्ने सादौ नेसादिरिति वाच्यं ॥
ऐसादेशे स्थानषष्ठ्याभिसक्त्वारेण प्रसंगनिमित्तकत्वेन तादृशास्य संगस्यातिदेष्टुमशक्यत्वेपि आहार्य उच्चार्यमाणबुद्धेरतिदेष्टुं
शक्यत्वात् ॥ अत एव न स्लुमतीति चरितार्थमित्यन्यत्र विस्तरः ॥ तत्त्वं चेति प्रत्ययस्येतराविशेषणत्वमिति ॥ प्रत्ययनिमित्तता च प्रत्यय
त्वतच्छाप्यधर्मेणैव गृह्यते । तेन ऊ प्रत्ययस्य अच्त्वेन प्राधान्येपि न क्षतिः ॥ अत्र इतरपदेन वर्णो विवक्ष्यते । तेन लिङ्ङ्सादेः पदत्वा
दिसिद्धिः ॥ तथाचायं सूत्रार्थः । प्रत्ययलोपे सति प्रत्ययो सलुप्तप्रत्ययसंबंधिअल्मात्रवृत्तिधर्मावच्छिन्नविशेष्यतानिरूपितप्रका
रतानाश्रयत्वरूपप्राधान्येन प्रत्ययवृत्तव्याप्यधर्मेणोच्चयत्न प्रत्ययो निमित्तं तत्कार्यं प्रत्ययलक्षणे भवतीति । मात्रपदनिवेशात् सं
बुद्धेंतअशाद्स्यपदत्वासिद्धिः ॥ वर्णस्येतराविशेषणत्वरूपमिति ॥ स्वसमानविभक्त्यंतार्थनिरूपितप्रकारतानापन्नत्वरूपमित्य

+ वर्णाश्रयकविधौ प्रत्ययलक्षणाभावत्वं चेत्यर्थः + ५

र्थः॥ स्ववर्णवाचकपदोत्तरविभक्तिः तेन अचः सप्तम्यर्थनिरूपितविशेषणत्वेपि न क्षतिः। नचैवं रीङागवेहितमित्यस्य वारणेपि चित्रेसाधसि
ध्दिरत आह॥ प्रत्ययनिरूपितविशेष्यतारूपं चेति। आदिस्तु प्रत्ययनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वरूप[illegible]धान्यं विवक्ष्यते तदारूप
द्वयेन प्राधान्यनिरूपणमर्थमेव। ऊर्णुनोति॥ ननु संधिवेलेत्यादिना जातार्थे विहितस्य चित्रा रेवती सादिना लुकि लुकृतद्धितेत्यादिना
स्त्रीप्रत्ययलुकि लुग्ध्येलक्ष्यणन्यायेन टाबपि दुर्लभ इति चेन्न॥ निमित्तभूतअर्थभेदात् लक्ष्यभेदेनादोषात्॥ ननु स्फटकृत्प्रासाद
इत्यादौ स्थानिवत्त्वेनासंतत्वमादायप्राप्तयोः सोर्मनसी अत्वसंतस्येति च स्वरदीर्घयोरभावाय प्रत्ययलक्षणसूत्रस्य यत्र प्रत्ययस्या
साधारणं रूपमाश्रीयते तत्रैवेति नियामकत्वाव[illegible]श्यकत्त्वात् अल्विधौ विध्यर्थत्वाभावेन गवेहितमित्यादाववाध्यत्वात्स्यादयं स्य
र्थसत आह॥ इत्यमिति॥ प्रत्ययलक्षणविधौरिति॥ अलोमोष्वसीति पर्युदासेन श्रूयमाणअसंतस्यैव ग्रहणेन स्वराभावस्य अत्वसंतस्ये
त्यत्रेभतु सोह चर्येण स्फ्वानोक्तं तस्यैवासो ग्रहणे दीर्घाभावस्य च सिध्या एतस्य अलि विध्यर्थत्वादिति भावः॥ इकस्तरति षष्ठं तानु
केरणे दीर्घस्येष्टत्वे प्रकृतिवदनुकरणं भवतीत्यस्यानित्यत्वेन संसाध्यः॥ युक्तं श्वायं विधिपक्षः अतएव प्रत्ययस्य लुग्भिस्ततः प्रत्यय
स्येत्यनुवृत्त्या सिद्धे आद्यप्रत्ययग्रहणं सार्थकं॥ तथाचओष्ठी येत्यादौ अवयवलोपे अनुनासिकलोपाभावायानियमार्थत्वे तु अल्
विधौ प्रवृत्त्यभावेन तदसंगतिः॥ इदमेव प्रत्ययग्रहणं ज्ञापकं अवयवे प्रत्ययलक्षणव्यवहारस्य। तथाच आदेशप्रत्यययोः इदुदुपधस्ये
त्यनयोः र्विक्षणादिना प्रश्रयणीयं सास्यदाधो रिति च चरितार्थं॥ अत एव दोधवीतीति सूत्रे तेति ङ्केइत्यत्र क्विंनिपातितेऽआत्मनेपदं नै
तेदस्ति अनुदात्तङित इत्यस्येव सिद्धं नियमार्थं तर्हि भविष्यति अत्रैव यङ्लुगंतस्य नान्यत्र बेभिदीतीत्युक्तं भाष्ये॥ नच तिजेरनुदा
त्तेत्वलक्षणमात्मनेपदं सिध्यमितिभिप्रायकं तद्भाष्यं। अनुदात्तेत्त्वपठितस्य निरर्सनंतत्वे न ततो यङ्भावात्॥ अत एव अनुबंधक
रणे सामर्थ्यात् आत्मनेतादात्मनेपदमित्युक्तं गुप्तिजित्यादिसूत्रे भाष्ये। अत एवौतणेद्धमित्यत्रीरित्यादौत्त्वाह रमृशास इदङ्हलो
रिति च सिध्यति॥ अन्यथा नल्विधावितिनिषेधेन स्थानिवत्त्वास्याहतादिपरकत्वाभावेन तदनापत्तिः॥ आशासः क्वावुपसं

स्थानमितिवार्तिकंनियमार्थं॥तेनआशास्तेइत्यत्रनेत्वं।अतएवपंचालापत्ययोगिकपंचालशब्दाद्युवप्रत्ययान्तात्युवप्रत्ययेगोत्रेलुगचीत्र
लुकसिद्धिः॥युवप्रत्ययस्यण्यक्षत्रियार्षेतिलुकिप्रत्ययलक्षणेअजादिप्रागदीव्यतीयविषयत्वात्।नलुमतेतिनिषेधस्तुन।प्रत्ययोद्दे
शत्वेपिअंगोद्देश्यकत्वाभावात्।नन्वेवंवनशब्दादिनेतातणिचितत्तःक्विपिणिलोपटिलोपयोःकृतयोःओजसादिभ्युवानोवानरेसादौ
अतिदेशेनरत्वेततोतरत्वन्हलितिनियमेनदीर्घोनापत्तिः॥इष्टापत्तिनिर्वाहस्तुनअल्लोपस्यस्थानिवत्त्वात्।एवंबिदशब्दाद्दुकर्षकाधि
र्मताद्याचारक्विपिलटिअत्रोलुकःप्रत्ययलक्षणेनजिदंतत्वात्स्वरितत्वत्यासनेपदापत्तिः॥एवंशास्तेत्यत्रस्थःकश्चेतिचात्क्विपि
घुमास्थेतीत्वापत्तिः।अवकाराद्दावितिवक्तव्यमितिवार्तिकंतुपावानइत्येतस्यनिपातसिद्धिमाश्रित्यप्रत्याख्यातं।एवंचधीवरी
पीवरीत्यर्थंध्याप्योःसंप्रसारणंचक्विपूकनिपूचेतिचेन्नइत्यमितिकृशोपिनेतिचेन्न॥रत्नहनिषत्यत्रहभादिसाहचर्येणस्वरितत्वजि
तस्यत्रेस्वरितसाहचर्येणवक्ष्यमाणेएवतयोःप्रवृत्तेः।एवंघुमास्थेत्यत्रापिङिसाहचर्येणवक्ष्यमाणेएवप्रवृत्तेः।स्थःकश्चेतिचे
नविन्वएवकविधानेनादोषात्॥धीध्यायतेर्दधातेर्वेतिक्विपपृक्वचीतिवार्तिकस्थभाष्येदधातेर्वेत्यधिकेदेशिनः॥नन्वेवमपि
सजूरित्यादौप्रत्ययलक्षणेनसोरुगिन्वमादायउगिल्लक्षणङीबापत्तिः।अत।बाधामित्यादौभषभावस्योसिद्धत्वात्पूर्वंसिजूलोपेत
स्यप्रत्ययलक्षणेनसादित्वमाश्रित्यभषभावापत्तिश्च।अभूतइत्यत्रसिचोलुकितस्यप्रत्ययलक्षणेनसोतेतिचूर्यातइडागमापत्तिश्च।विद्यमानास्तिचरेयर्थस्तुअसंगतइतिस्पष्टंशेखरेइतिचेन्न॥प्रथमायाअन्याभिहितकर्त्रार्थान्यतमार्थः:तस्यचप्राधा
न्यमितिसजूरित्यत्रस्त्रीत्वस्यतादृशप्रधानार्थगतत्वाभावेनप्रधानाप्रधानन्यायेनैवङीपोवारणात्॥किंचसुप्रत्ययस्थानेसप्र
त्ययकरणेनादोषाच्च॥एवंअबाधामित्यत्रापिनदोषः॥स्थोरिकित्यासकारेएवभषभावविधानेनवर्णाश्रयत्वेनप्रत्ययल
क्षणाभावात्।अभूदित्यत्रापिनदोषः।सोतादितिविशेषणसामर्थ्येनश्रूयमाणसांताश्रयणादितिस्पष्टंशेखरे।नन्वेवमपिरा
जपुरुषःभूहितमित्यादौभसंज्ञोवङादीनांनलुमतेतिनिषेधेनवारणेपिगमतीत्यत्रओतोमशासोरित्येकादेशापत्तिरितिचेन्न॥

२९

दि

धातोरधिमटः स्मरेदित्तिआउजादीनामितिसूत्रस्थवार्तिकबलेन एकादेशप्रकरणेचेयधिकरणान्वयबोधनेनाभियोच्यतास्मिन्अ
मोवयवेन्वीसर्यप्रकरणेनाचित्रेसादाविवर्णप्राधान्यात्प्रत्ययलक्षणाप्रवृत्तेः अन्यथाआगमसमभिव्याहारेविशिष्टस्येवधा
तुत्वादिव्यवहारेणतदसंगतिः ॥ अत एवचभवेयुरिसत्रउस्यपदांतादित्तिपूर्वत्वसिधिः ॥ सूत्रंतुअयुरिसादेसावकाशं ॥ नचात्त
रसादेतास्यनुदात्तेशत्तिअनुदात्ततापत्तिः ॥ लसार्वधातुकस्यप्रत्ययलक्षणेनादंतोपदिश्यमानात्परत्वात् ॥ एवंहस्तइरसा
देमात्रन्चोलुद्भिप्रत्ययलक्षणेनचितरत्तिअंतोदात्तत्वापत्तिः । कुट्टिन्चोऽ प्रत्ययस्यापिचित्तःसत्वेनचित्वस्येप्रत्ययाप्रत्ययसो
धारणत्वादितिवाच्यं ॥ ओंथेअनुदात्तेतु ङिद्ग्रहणेनलुप्तविकरणमादायतास्यनुदात्तेदिसस्याप्रवृत्तिज्ञापनेनादोषात् ॥ अंते
चरसदघेटितेअनुबंधलक्षणेस्वरेप्रत्ययलक्षणेनेतिपरिभाषयाअदोषात् । नियमपक्षस्येयथाआवश्यकतायथावादूषणोधा
रस्तथास्पष्टमन्यत्रतत्तएवावधार्यतामित्यलं ॥ ५ ॥ उणादयो ॥ सिधमिति ॥ विधरदेवयोरित्तिसूत्रेवप्रत्ययग्रहणेनसत्तस्यंतधा
तुग्रहणेतदादिविधिज्ञापनादितिभावः ॥ भाष्येस्फुटमिति ॥ तत्रहिशं खइसादेआदेशानाशं क्योणादीनांप्रतिषेधोवक्तव्यःप्राति
दिकविज्ञानाच्चभगवतःपाणिनेःसिधमित्युक्तं ॥ तत्रपाणिनेरित्युक्त्याउत्तस्याव्युत्पन्नानिउणादीनित्तिमतंसूचितं ॥ अयामं
तात्याप्येतिष्णुभितिसूत्रेभ्याकरणांतेरस्येवसर्वनामस्थानइतिमहासंज्ञावत् ॥ अत एवभाष्येउणादयोऽव्युत्पन्नानीत्ये
वोक्तंनत्वनेकार्थाअपिधातवइतिवत्अव्युत्पन्नानीत्यपीत्युक्तं ॥ सर्पिबाधजुषेसादेषत्वंचबहुलग्रहणादेव ॥ अतएवोदे
शमत्ययोरित्तिसूत्रेभाष्येकत्सरोवसेतर्सेइसादेव्याकरणांतरेसरकूसादिप्रत्ययोक्तेषत्वमाशंक्यासिधांतिनाअव्युत्पन्ना
निप्रातिपदिकानीत्युक्तं ॥ ततःशंकिनायेषांसर्पिरादीनांसर्पिरित्यादेरुत्वानुरोधेनसंज्ञातानांसर्पिषेसादेरुत्वंदृश्यतेत्ता
दृशेषुषत्वविषयोदोहरणेषुअव्युत्पत्तिपक्षाश्रयणंनशक्यंकर्तुंसर्पिषेसादेषत्वानापत्तेरितिशंकितेसिधांतिनोक्तंबहु

लवचनात्सिद्धंबहुलंप्रत्ययसंज्ञाभवतीत्युक्तं।बहुलमित्युक्तेअप्युत्पन्नेपिप्रत्ययसंज्ञाप्रयुक्तंकार्यंभवतीतिव्युत्पन्नत्वेचकार्य
विशेषेतदभावइतिवचःसंभित्यादेअंगत्वेप्रयुक्तगुणस्येष्टत्वाभावेस्यचसिद्धिरितितदर्थः॥एतेनसर्पिषेत्यादौषत्वंपृषोदरादि
त्वेनवोक्तंनिरस्तं॥उक्तभाष्यविरोधात्॥किंचोत्तरपदाधिकारेणपृषोदरादीनांसत्यसमासेएवप्रवृत्तेः॥हंसेसिंहयोरूपा
दानेचदृष्टांतार्थयपात्तयोरूणादित्वात्साधुत्वं।तथागूढोत्मादेःपृषोदरादित्वादितिनकश्चिद्दोषः।दंशानमित्यत्रनलोप
स्तुदंशादंशानेइतिनिपातनादेव।चुट्टूइतिसूत्रस्थभाष्यप्रामाण्येनक्वचिदर्थसहितस्यधातोःपाठलाभात्॥प्रतिदीम्नइत्या
दौदीर्घश्चसावभिधानेबहुलग्रहणादेवेति।विस्तरस्तूणादयइतिसूत्रशब्देंदुशेखरेअवसेयः॥५॥प्रत्ययग्रहणेय॥
चिकीर्षतीति॥नंद्राइतितुआदिभूतादचःपरेषांनिषेधकं॥[illegible]यिषतीत्यादितुमाधवानुरोधेनचिंत्यमितिस्पष्टंप्रत्ययमालायांशब्देंदुशे
खरे॥धातुत्वाद्यापत्तिरिति।ततश्चसुपोधात्वितिलुगापत्तिरितिभावः॥ननुदेवदत्तऊसइत्यत्रसमुदायस्यधातुत्वेपिदेवदत्तस्याख्या
तार्थकर्तर्येवान्वयेनसन्नंतसमुदायस्यानर्थकत्वेननसुपोधात्वितिलुकःप्राप्तिः॥प्रातिपदिकसाहचर्येणार्थवतएवधातोर्ग्रहणा
दितिचेन्न॥आख्यातवादस्थमंजूषोक्तपरेतुमतरीत्यातिङांकर्त्राद्यद्योतकतयाधातोरेवकर्त्रादिवाचकत्वेनसन्नंतेएवदेवदत्ता
न्वयेनार्थवत्त्वात्॥येनविधिरित्यनेनसिद्धइति॥समासेनभूपूर्वेतिसूत्रोद्योते[illegible]तुवस्तुतोयंवाचनिकइत्येवयुक्तं।अन्यथा
वनोरचयज्ञिञौश्चेत्यादौसमासप्रत्ययविधौविस्मनेनास्यापिनिषेधःस्यात्ममतुसोन्नस्यैवासनिषेधइतिनदोषइत्यु
क्तं।तस्यायमाशयः॥ग्रहणवताप्रातिपदिकेनेतिनापूर्वंकिंतुप्रत्ययविधौप्रतिषेधइत्यस्यौनुवादकं।अतएवउगिद्व
र्णग्रहणवर्जमित्यारब्धं।अतएवयेननाप्राप्तिन्यायेनअपंचम्याअयंनिषेधःवाचनिकतदंतविधेरेवेतिपरूपेत्यादौउत्तर
पदस्यविशेष्यतयाप्राप्ततदंतविधिःस्यादेवेतिउत्तरपदेतिपरिभाषारंभइतिस्पष्टंयेनविधिरित्यत्रोद्योते।अतएवेत

चंद्रि

30

व

ढ्टके तदन्तांशस्यापवादस्याग्रिमग्रन्थः संगच्छते। वस्तुतः मूलोक्तमपि युक्तं ग्रहणवता प्रातिपदिकेनेति अपूर्वमेव प्रत्ययविधावित्ति तु अनुवा
दकं उगिद्ग्रहणे तिएकदेशोनुवादः॥ अत एवास्मायामेधेयत्र तदन्तविधिः॥ तत्र न गृह्यमाण प्रातिपदिकेत्यमिसयैव वक्ष्यते॥ उत्तरपदेति
वचनं उत्तरपदाधिकारबाधनार्थं न तदन्तविधिप्रतिषेधकं इत्यपि वक्ष्यते। एतद्धूटके कृत्तिस्तु प्रत्ययविशेषणकृतदन्तविधेरेव बा
धबोधिका तेनैङं तादिसर्थं आभरति दिक्। सचेति। विशेष्यान्तरासत्वेरेति। अस्य क्वचिदित्यादिः॥ अयं भावः॥ यत्र यजिशोभ्वे सादो वि
शेष्यान्तरसत्वे तत्र परिभाषेयं पस्थितत्तदादिपदं न्यूनाधिकव्यावृत्तये। प्रातिपदिकादिपदेः सामानाधिकरण्येनान्वेति। यत्र ह
ङ्ग्यादिसूत्रादौ विशेष्यान्तरासत्वं तत्रोपस्थिततदादिपदं विशेष्यमादाय तदन्तविधिः॥ यत्र गोस्त्रियोरित्यादौ स्त्रीप्रत्यये चेति
निषेधेन तदादिरित्यस्यानुपस्थितिः। तेत्र क्वचित् स्वच्छले शब्दरूपं विशेष्यमादाय तदन्तविधिरिति॥ तत्र उपसर्जनस्येति तु न विशेष्यं
गोशब्दांशोपितपात्वोपत्तौ अतिस्रु गोरित्यत्र ह्रस्वापत्तेः॥ ध्वनितं तच्चैतत् तत्सूत्रे आकरे॥ स्त्रीप्रत्ययङ्याबुभिरुपस्थिततदादिरित्य
पिन विशेष्यं। अतिराजकुमारिरित्यत्र राजकुमारीयस्य बहुश्रेयसी यत्र श्रेयसी स्वस्य चङ्यन्तत्वे प्रतिपादनीये स्त्रीप्रत्यये चेति
निषेधेन तदादिरित्यस्यैवानुपस्थितेः। आक्षेपासंभवादिति। किंच फलाभावादत्र नाक्षेपः। यथा पीनत्वानुपपत्त्या अनुमीयमा
नरात्रिभोजनस्य पीनत्वोपपत्तिः फलं न तथा एतत्सूत्रे तदनुमानेन संबुध्युपपत्तिर्भवति। किंच प्रत्ययस्योत्पत्तौ अङ्गापेक्षत्वेपि ता
नेतदपेक्षत्वाभावेन शास्त्रे तदाक्षेपे मानाभावः। यत्र प्रत्ययो निमित्तत्वेनोत्त॥ वांतो यि हृदयस्य हृल्लेखयङ् मा निनोश्चेत्यादौ॥
अंशमात्रेति। तदंशतांशाश्रयस्तु नोपतिष्ठते। स्यतासी लृलुटोरित्यादौ लृलुटोः परयोरित्यर्थे नियमेनावधित्वाकांक्षत्वेनोपस्थित
धातोरित्यस्यैवावधित्वेनान्वयान्न तदन्तविधिरिति वक्ष्यमाणदिशा प्रत्ययग्रहणे चापंचम्या इति निषेधादिति भावः॥ ननु
तदादितदन्तयोरेकपरिभाषाबोधितत्वेन उभयोः संनियोगशिष्टत्वप्रतीतेः संनियोगशिष्टपरिभाषया तदाद्यंतांशमात्रोप
स्थितिर्न भविष्यतीति चेन्न॥ देवदत्तश्चिकीर्षतीत्यत्राविशिष्टस्यान्यधातुत्वान्निराकरणपरभाष्येण संनियोगशिष्टत्वानं

गीकारात् ॥ यत्तु तदंतांशस्य नोपतिष्ठते लेरवग्रहणेन सामान्यत एव सप्तम्यं तोपात्ते प्रत्यये तदंतविध्यभावकल्पनात् ॥ तेन रूपिचेत्यादौ न तदं
तविधिरिति । तन्न ॥ लेरवग्रहणस्यान्यार्थतायाः उत्तरपदाधिकारेऽरतिपरिभाषायां निरूपयिष्यमाणत्वात् ॥ तत्र तदाद्यंशोपस्थिति
फलं तु पद्धीम्रछ्रीयते ऽस्यत्र पुंवत्त्वाभावः ॥ अशब्दात् स्वार्थे यतियस्येति लोपे गोशब्देन हृदयशब्देन समासे गोयं हृदययऽस्यादौ अवादेशाहृद
देशाभावश्च ॥ यत्तु हृदयय ऽस्येत्र यस्येति चेति लोपाभावोपि फलमिति मिश्रास्तन्न ॥ अंगत्वाभावेनैव लोपाप्राप्तेः ॥ यदपि सुषूददेवद
ताभ्यामित्यादौ सासदाद्योरिति निषेधाभावः फलमिति । तन्न । स्वादिष्विति सूत्रे यस्मात्प्रत्ययविधिस्तदादी सनुवत्यादोषवारणात् ।
एउं तादिति ॥ इदं तु पल्लक्षणं हस्वां तादिसस्यापि । तत्फलं हे कर्तरादिसत्र लोपाभावः ॥ ननु तदादिरिसस्योपस्थितावपि हे कर्तारदि
स्यादावतिप्रसंगस्तदवस्थः तदादित्वस्य प्रत्ययावयवाकारेपि सत्त्वादिति चेत्सत्यं ॥ तदादीसंशोपस्थितिसामर्थ्येन एतत्सूत्रविषये प्रत्य
येविधानावधित्वाक्रांतत्वविशिष्टतदादेरेव ग्रहणात् न दोषऽइत्याशयात् ॥ यत्तु अंगसंज्ञायां प्रत्ययावयवाघटितस्यैव तदादेर्ग्रह
णेनात्रापि तादृशस्यैव ग्रहणं तु मुचितत्वान्न दोष इत्याहुस्तन्न ॥ सेनान्यं ताध्यात्तवऽइत्यत्र उपस्थिततदादीसस्य तथाविधत्वे सन्नंते
पदे अन्वयानर्हतया तदनुपस्थित्यापत्तेः ॥ कुलेसत्र परादिवद्भावेनाकारस्य प्रत्ययावयवत्वात् संबुद्धिलोपानापत्तेश्च ॥ तदर्थमं
तवत्सूत्रानतिदिष्टप्रत्ययावयवाघटितस्य प्रत्ययावयवमात्रघटितभिन्नस्य वाऽस्यादिप्रयासे महान् कुशः ॥ वस्तुतः एउः साहचर्येण प्र
कस्येवयवहस्वस्यैव ग्रहणात् हे कर्तारदित्यादौ दोषवारणेन मानामेष प्रयासोऽसंगत एवेत्यन्यत्र विस्तरः ॥ गार्ग्यशब्दादेव प्रत्ययो न वि
शिष्टादिति । फलं विशिष्टस्य तु अर्थवत्सूत्रेण प्रातिपदिकत्वं समासकृत नियमस्तन्न । राजपुरुषायेत्यादौ पुरुषायेत्यादेरिव गा
र्ग्यायणस्यानर्थकत्वात् । अर्थवदुत्तरभागाभावात् ॥ यत्तु अत्र समासकृतनियमस्तन्न । नियमस्य सजातीयापेक्षत्वेन परस्प
रासमानाधिकरणवृत्तिद्वयाप्रघटिते एव प्रवृत्तेः । राज्ञः कुमारीश्रितरत्तिवत् वृत्तिद्वयकल्पनायामपि प्रातिपदिकत्वं समु
दायस्य सुलभं । अत्र समासत्वप्रयुक्तं अवयवस्य प्रातिपदिकत्वमस्ति तथापि सुबुत्पत्तिः समुदायादेव । एकाचूद्विर्वचनन्यायाद

कृदंतकतदंतांशस्यापवादस्याग्रिमग्रंथः संगच्छते। वस्तुतः मूलोक्तमपि युक्तं ग्रहणवता प्रातिपदिकेनेति अपूर्वमेव प्रत्ययविधाविति तु अनुवा
दकं। उगिद्ग्रहणे ति एकदेशानुवादः॥ अत एवास्मायामेधेयत्र तदंतविधिः॥ तत्र न गृह्यमाणप्रातिपदिकत्वमित्यग्रे वक्ष्यते॥ उत्तरपदेति
वचनं उत्तरपदाधिकारबाधनार्थं [illegible] न तदंतविधिप्रतिषेधकं रूपमपि वक्ष्यते। एतद्वृत्तिके कृत्स्न प्रत्ययविशेषणकृतदंतविधेरेव बा
धबोधिका तेन उःतादिसर्पेत्साम इति दिक्। सचेति। विशेष्यांतरासत्वेऽरीति। अस्य क्वचिदित्यादिः॥ अयं भावः॥ यत्र यजिनोऽश्वेत्यादौ वि
शेष्यांतरसत्वं तत्र परिभाषोपस्थिततदादिपदं न्यूनाधिकव्यावर्तकं। प्रातिपदिकादिपदैः सामानाधिकरण्येनान्वेति। यत्र ह
लउग्यादिसूत्रादौ विशेष्यांतरासत्वं तत्रोपस्थिततदादिपदं विशेष्यमादाय तदंतविधिः॥ यत्र गोस्त्रियोरित्यादौ स्त्रीप्रत्यये चेति
निषेधेन तदादिरित्यस्यानुपस्थितिः। तत्र क्वचित्स्थले शाब्दरूपं विशेष्यमादाय तदंतविधिरिति॥ तत्र उपसर्जनस्येति तु न विशेष्यं
गोशाष्टांशोपितत्वात् लोपतोऽतिस्तु गोरित्यत्र ह्रस्वापत्तेः॥ ध्वनितं तत्त्वैतत् तत्सूत्रे आकरे। स्त्रीप्रत्ययङ्याबुभिरुपस्थिततदादिरित्य
पिन विशेष्यं। अतिराजकुमारिरित्यत्र राजकुमारीयस्य बहुश्रेयसीत्यत्र श्रेयसीत्यस्य चङ्यंतत्वे प्रतिपादनीये स्त्रीप्रत्यये चेति
निषेधेन तदादिरित्यस्यैवानुपस्थितेः। आक्षेपासंभवादिति। किंच फलाभावादत्र नाक्षेपः। यथा पीनत्वानुपपत्त्या अनुमीयमा
नरात्रिभोजनस्य पीनत्वोपपत्तिः फलं न तथा एतत्सूत्रे तदनुमानेन संबुध्युपपत्तिर्भवति। किंच प्रत्ययस्योत्पत्तौ अंगापेक्षत्वेपि ता
नेतदपेक्षत्वाभावेन शास्त्रे तदाक्षेपे मानाभावः। यत्र प्रत्ययो निमित्तत्वेनोक्त॥ वांतो यि हृदयस्य हृल्लेखयक्ष्यङ्मा निनोश्वेत्यादौ॥
अंशमात्रेति। तदंशतांश[illegible]स्तु नोपतिष्ठते। स्यत्तासी लृलुटोरित्यादौ लृलुटोः परयोरित्यर्थे नियमेनावधित्साकांक्षत्वेनोपस्थित
धातोरित्यस्यैवावधित्वेनान्वयान्न तदंतविधिरिति वक्ष्यमाणदिशा प्रत्ययग्रहणे चापंचम्या इति निषेधादिति भावः॥ ननु
तदादितदंतयोरेकपरिभाषाबोधितत्वेन उभयोः संनियोगशिष्टत्वम् अतीसा संनियोगशिष्टपरिभाषया तदाद्येतांशमात्रोप
स्थितिर्न भविष्यतीतिचेन्न॥ देवदत्तश्चिकीर्षतीत्यत्राविशिष्टस्यानेया धातुत्वनिराकरणपरभाष्येण संनियोगशिष्टत्वानं

गीकारात्॥यत्तु तदंतां शास्त्रेनोपतिष्ठते लेखग्रहणेन सामान्यत एव सप्तम्यंतोपात्तप्रत्ययेतदंतविध्यभावकल्पनात्॥तेन स्रुपि चेत्यादौ न तदं
तविधिरिति। तन्न॥ लेखग्रहणस्यान्यार्थतायाः उत्तरपदाधिकारे इति परिभाषायां निरूपयिष्यमाणत्वात्॥ तत्र तदाद्यंत्रोपस्थिति
फलं तु पद्भीम्रद्ध्यते इत्यत्र पुंवत्त्वाभावः॥ अशब्दात् स्वार्थे यतियस्येति लोपे गोशब्देन हृदयशब्देन समासे गोयंहृदययस्यादौ अवादेशहृद
देशाभावश्च॥ यत्तु हृदयय इत्यत्र यस्येति चेति लोपाभावोपि फलमिति मिश्रस्तन्न॥ अंगत्वाभावेनैव लोपाप्राप्तेः॥ यदपि सुषूद्देवद
ताभ्यामित्यादौ सात्वदाध्योरिति निषेधाभावः फलमिति। तन्न। स्वादिष्विति सूत्रे यस्मात्प्रत्ययविधिस्तदादी सन्तु वत्यादौ षत्वावारणात्।
एऊं तादिति॥ इदं तु पल्लक्षणं हस्वांतादिसस्यापि। तत्फलं हे कर्तरदिस्यत्र लोपाभावः॥ ननु तदादिरिसस्योपस्थितौ वपिहेकर्तारदि
त्यादावतिप्रसंगस्तदवस्थः तदादित्वस्य प्रत्ययावयवाकारेपि सत्वादिति चेत्सत्यं॥ तदादीसंज्ञोपस्थितिसामर्थ्येन एतत्सूत्रविषये प्रत्य
ये विधानावधित्वाक्रांतत्वविशिष्टे तदादेरेव ग्रहणात् न दोष इत्साशयात्॥ यत्तु अंगसंज्ञायां प्रत्ययावयवाघटितस्यैव तदादेर्ग्रह
णेनात्रापि तादृशस्यैव ग्रहणात्तु मुचितत्वान्न दोष इत्याहुस्तन्न॥ सेनार्थंताधातवत्यत्र उपस्थिततदादीसस्य तथार्थकत्वे सन्नंते
पदे अन्वयानर्हतयात्तदनुपस्थित्यापत्तेः॥ कुलेसत्र परादिवद्भावेनाकारस्य प्रत्ययावयवत्वात् संबुद्धिलोपानापत्तेश्च॥ तदर्थं अं
तवत्सूत्रानतिदिष्टप्रत्ययावयवाघटितस्य प्रत्ययावयवमात्रघटितभिन्नस्य वा इत्सादिप्रयासे महान् कुंशः॥ वस्तुतः एऊ साहचर्येण प्र
कृत्यवयवरूपस्यैव ग्रहणात् हे कर्तारदित्यादौ दोषवारणेन ध्यानामिषप्रयासोऽसंगत एवेत्यन्यत्र विस्तरः॥ गार्ग्यशब्दादेव प्रत्ययेन वि
शिष्टादिति। फगविशिष्टस्य तु अर्थवत्सूत्रेण प्रातिपदिकत्वं समासकृतनियमस्तन्न। राजपुरुषायेत्यादौ पुरुषावित्यादेरिव गा
र्ग्यायणस्यानर्थकत्वात्। अर्थवदुत्तरभागाभावात्॥ यत्तु अत्र समासकृतनियमस्तन्न। नियमस्य सजातीयापेक्षत्वेन परस्प
रासमानाधिकरणवृत्तिद्वयाप्रघटिते एव प्रवृत्तेः। राज्ञः कुमारीश्रितरतिवत् वृत्तिद्वयकल्पनायामपि प्रातिपदिकत्वं समु
दायस्य स्फुलभं। अत्र समासत्वप्रयुक्तं अवयवत्वस्य प्रातिपदिकत्वमस्ति तथापि स्फबुत्पत्तिः समुदायादेव। एकाचू द्विर्वचनन्यायाद

साधुः ।तन्न ॥ राजकुमारीश्रितं पश्येतिवाक्ये तथात्वेन प्रातिपदिकसंज्ञापत्तेः ।राजकुमारीश्रितपुत्र इति समासस्य तद्घटितत्वेन साजात्यासंभ
वाच्च ॥ युगपद्वृत्तिद्वयकल्पनमप्ययुक्तं ।समर्थसूत्रस्थभाष्यविरोधात् ॥ तत्र हि राज्ञो गोः गोः स्त्री इदं इत्यर्थे राजगवीक्षीरमिति तत्र युगप
त्समास समासमात्रांक्येऽसामर्थ्यात् कृष्णमसामर्थ्यं सापेक्षमसमर्थवद्भवतीति समाहितमिति दिक् ॥ नन्वेवमपि यज्ञितस्येति षष्ठी
विषयेपि एतस्य शिभाजो पक्षितो गार्ग्यस्य षष्ठ्यंतत्वाभाव इति चेदर्शनत्वाः ।तत्संबंधिअपत्यमित्यर्थे सूत्रे समर्थानां मध्ये प्रथम
पदबोध्यात् यत्रेतरत्रं तत्प्रातिपदिकात् फगित्यर्थेनादोषात् ॥ तत्र च कालतनेतिज्ञापकात् स्वार्थेधरिपूर्णस्येवार्थांतरान्वयेन सुबंतात्
तद्धितोत्पत्त्यां व्यवहितं ततः परत्वं ।एवं च षष्ठ्यंतत्वेन वचनेन निमित्तत्वोपि प्रविष्टं किंतु न्यायप्राप्तमिति न कश्चिद्दोषः ॥ न च गार्ग्यो व्याघ्र
इव गार्ग्यव्याघ्रः तस्यापत्यमित्यर्थे पूर्वपदे फक्ष्यारितार्थेन गार्ग्यस्यापत्यमित्यर्थे सुब्व्यवधाने फगनापत्तिरिति वाच्यं ॥ बहुवच
ने परतो लुगित्यर्थः ।तत्राधिको दोषः अत्र यद्यत्र उदात्तनिवृत्तिस्वरः प्राप्नोतीति यञ्जसूत्रेण तदनभिधानात् ॥ अन्यथा गार्ग्यव्या
घ्रःसादेः लुगनापत्तेरेव वक्तव्यतयातदसंगतिः ॥ अत एवानभिहितसूत्रे तद्धितग्रहणस्योपगव इत्युदाहरणं दत्तं भाष्ये ॥ अन्यथाऽ
पत्यार्थस्य तेनोक्तत्वादपि संबंधस्य तेनानुक्तत्वाच्चाव्याप्त्यासंगतिः ।अत एव तस्यापत्यमिति सूत्रे भाष्ये एकवचनं नपुंसकं निर्देशात् द्वि
वचनबहुवचनाभ्यां पुंनपुंसकयोश्चानुपपत्तिमाशंक्य तद्धितार्थनिर्देशो लिंगवचनेन प्रमाणं तस्याविवक्षितत्वादित्युक्तं ।अन्यथा
पुंस्त्वनपुंसकयोरनुपपत्त्यभावेपि द्विवचनबहुवचनाभ्यां प्रत्ययानुपपत्तावसंगतिः ।मतुविशिष्टस्यार्थत्वेन तत्संगतिः ॥ तस्या
पत्यमित्यस्य स्वस्थाने प्रयोजनोऽन्युक्तं कथं पुनरिच्छतोऽप्यपवादः प्राप्नुवन् शक्यो बाधितुं तस्य ग्रहणसामर्थ्यात् किमिदं भवानध्योरूपस्य तस्य
ग्रहणे स्येव प्रयोजनमाह न पुनः सर्वस्य योगस्य आवश्यमुत्तरार्थं अर्थनिर्देशः कर्तव्यः समर्थविभक्तिरपि अवश्यमुत्तरार्थं प्रतिनिर्दे
ष्टव्या इति तस्यापत्यमिति सूत्रस्थं भाष्यं तु एकदेश्युक्तिरिति स्पष्टं कैयटीये ।अत एव मतुप्सूत्रे भाष्ये चित्रा गावो स्य संतीत्यर्थे मतुप्
कस्मान्नेत्याशंक्यावयवादसामर्थ्यात् समुदायात् प्रातिपदिकत्वादिति समाहितं भाष्ये ।प्रातिपदिकप्रकृतिक इत्यर्थे असुबंतत्वादि
ति वक्ष्ये स्यात् । यद्वा नुपसर्जनाधिकारे प्रत्ययग्रहणे इति नियमेनाधिकस्यैव व्यावृत्तिर्न न्यूनस्येत्यर्थांगीकारेण दोषात् ॥ स

हियतो नेन नियमेनाधिकस्यैव व्यावृत्तिरत एव तदपवादभूतया स्त्रीप्रत्यये चेति परिभाषया अधिकस्यैव संग्राहकतया चरितार्थः ॥ अन्यथा स्त्रीप्र
त्यये चेति परिभाषया कुंभकारेयस्य दुर्वारत्वेन तदसंगतिः । स्पष्टा चेयं रीतिरनुपसर्जनादिति सूत्रे सर्वादीनीति सूत्रे उद्योते नामधातुप्रक्रि
यायां च शब्देंदुशेखरे च ॥ अस्यापवादः एः युवापत्यं अयनमित्यत्र फक्सिद्धिः ॥ इयन्मात्रमित्यत्र वत्वंतात् स्वार्थमात्रे च सिद्धिः ॥ अत ए
व स्वमनाथतेरसत्रेसोः पृथक्कृतो मनसः इत्यस्य सुबंतत्वात् क्यङ् सिद्धिः । तथा च राजपुरुषस्यापत्यमित्यर्थे राजपौरुषिरित्यपि इष्टमे
वेति बोध्यं ॥ चिकीर्षेरपत्यमित्यत्र इञ् इत्यस्य अपि धातुत्वापत्तिस्तु न दोषः । शब्देंदुशेखरे स्वाभाव्येन चिकीर्षेरित्यस्यैव क्रियावाचकत्वेनाख्यातनिरूपित
कर्तृत्वादिबोधकलकारादीनां समुदायादेवोत्पत्तेः ॥ न च सिषेचेत्यादौ सेचेत्यस्य पदत्वात् सात्पदाद्योरिति निषेधापत्तिरिति वाच्यं ॥ सुप्तिङ्
अंतमिति सूत्रे यस्मात् प्रत्ययविधिरित्यस्यानुवृत्तिसामर्थ्येन सेच इति प्रकृतिरित्यादिग्रहणे चरितार्थं समुदाये पदत्वमेतेनेति भाष्येणैव स
माधानात् ॥ एतेन समुदायोत्तरषष्ठ्याः समुदायाद्विधानेन गार्ग्याद् विहितत्वेन प्रकृतपरिभाषया तस्य षष्ठ्यंतत्वाभावेन षष्ठ्यंताद्विधीयमानत
द्धितस्याप्रसंग इति पाठकोक्तमपास्तं ॥ सुब्धियस्तु यञिञोश्चेत्यत्र यञं तेइं तं तत्प्रकृतिकापत्यार्थे षष्ठ्यंतस्माद्विहितात् तदादितदंतात् समर्थानाम्
प्रथमपदबोध्यात् फगिसेवार्थः ॥ तथापि उपगोरपत्यमौपगव इत्यादौ तस्यापत्यमित्येवं जातीयसूत्रैः विहितप्रत्ययानां अपत्यादिरर्थः
षष्ठ्यर्थश्च समुदायगम्य इति तद्धितार्थवादे मंजूषायां उक्तत्वाच्च ॥ तत्संबंधि अपत्यमित्याद्यर्थस्तु न युक्तः ॥ अन्यथा राजादितेरत्तेः सादौ
समर्थपरिभाषाप्रवृत्तये पदविधिरिति सूत्रस्वरसात् समासे गुणैः संगरेत्यादौ समासग्रहणेऽपि गतिर्गताविति सूत्रे पदस्येत्यधिकारात्
समर्थपरिभाषोपस्थितिरिति कैयटस्वरसाच्च पदत्वेन सुबंतत्वेन च वाच्ये साक्षादुद्देश्यतात् तत्र परिभाषाप्रवृत्तेः शब्देंदुशेखरादौ
उक्तत्वेन तद्धितादौ तत्परिभाषाप्रवृत्तावौपगवस्य गार्ग्यस्यापत्यमित्यर्थे फगापत्तेः । सुबंतात् तद्धितोत्पत्तेः पदविधित्वात् सुंदरस्य उप
गोरपत्यमुपगोर्देवदत्तस्य चापत्यं इत्यत्र सुंदरस्यौपगवः औपगवो देवदत्तस्येत्यादिवारणाय वाक्यभावस्तद्धितेष्वपि स्वक इति मं
जूषायां तथा उक्तत्वाच्च । अनभिहिताधिकारस्तु भाष्यं तु कैयटेनैवान्यथा योजितमिति न तद्विरोधः । तद्धितार्थे निर्दिष्टो लिंगवचनमप्र
माणमिति तस्यापत्यमिति सूत्रस्थभाष्यस्य तद्धितः अर्थो यस्येति बहुव्रीहिणा तद्धितप्रयोजकानिर्दिष्टोऽरसेवार्थः ॥ अत एव तद्धित

ग्रहणमपि स्वरसतः संगच्छते सार्थकं ॥ उद्योते त्वयाप्येवमेवोक्तत्वाच्च ॥ मतुप्सूत्रे समुदायात्प्रातिपदिकत्वादिति भाष्यस्यापि प्रातिपदिकप्रकृति
त्वाभावादिसेवार्थः ॥ अतएव सर्वस्य विकारः सार्वइति प्रातिपदिकाधिकारप्रयोजनपरभाष्यसंगतिः ॥ अन्यथा प्रातिपदिकाधिकारेणानुदात्ता
देरिस्यस्य प्रातिपदिकविशेषणत्वेपि सोवरीणां सप्तमीनां तदंतसप्तमीत्वेन न लुमतेस्यस्यानियतत्वेन वा सर्वस्येत्यत्र सर्वस्य रूपीस्यस्य प्रवृत्त्या
सर्वस्याद्युदात्तत्वेनागो दुर्वारतापत्तेः ॥ ममतु अनुदात्तादिप्रातिपदिकप्रकृतिकषष्ठ्यंतत्वान्नदोषः । प्रकृतपरिभाषयाऽधिकस्यैव व्यावृ
त्तिर्नन्यूनस्येत्यपि नयुक्तं । स्वीकृतेप्यनुपसर्जनाधिकारे कारीशब्दस्य स्त्रीप्रत्ययांतत्वेन कुंभकारेयस्य दुर्वारतापत्तेः । किंच पट्वीमृद्वीयतेर
यत्रत्वेन तदाद्यंशोपस्थानेनैव व्यावर्तितस्य पुंवद्भावस्यापत्तेश्च ॥ अयनामियादोषः गार्ग्यादिभ्यश्च व्यपदेशिवद्भावेन सिद्धः । स्वमनायतइत्यादे
सोः पृथक्करणेपि अवयवरूपमादाय मनसइत्यादेः सुबंतत्वं सुलभं । ननु रूपः श्रवणापत्तिः तन्निमित्तककार्याणि चस्युरिति चेत् भाष्य
प्रामाण्येन जातसमासनिवृत्तिवत् सुपनिवृत्तिरपि कल्प्येति न दोषः । परमत्र गार्ग्यायणइति प्रयोजनपरभाष्यस्य तु अयमभिप्रायः । तथा
हि नयत्र विषये एव तत्परिभाषाप्रवृत्तिमभिप्रेत्य प्रयोजनमुक्तवान् अपितु तस्येत्यनेन उपस्थापितषष्ठीविषये । तथाचेतत्परिभाषाभा
वे परस्य गार्ग्यस्यापत्याभिसंबंधविवक्षायां परमअस्गार्ग्यअस्ङसस्यापि यञंतप्रकृतिकषष्ठ्यंतत्वेन समुदायादपि फगापत्तिः अंगीकृ
तायां तु तस्यां यञंतप्रकृतिकषष्ठ्यंतत्वं गार्ग्यअस्ङसस्यैवेति न दोषः ॥ पूर्वपदे रूपः श्रवणं तु न ॥ फेरुत्सनंतरं कर्मधारये लुकः प्रवृत्तेः ।
नचांतरंगत्वात् पूर्वं कर्मधारयः तयोः पूर्वमेकार्थीभावाविवक्षणात् ॥ नच पश्चादपि कर्मधारयानापत्तिः । समर्थसूत्रभाष्यरीत्या विशिष्टे
नैकार्थीभावेऽवयवेन तदभावस्य वक्तुमशक्यत्वात् । निष्कृष्टैकार्थीभावाभावेपि वृत्तिरितिनु समानमेव ॥ ध्वनिताचेयंरीतिः रूप
आत्मनइति सूत्रे भाष्ये ॥ बहुलग्रहणेन षष्ठ्यंतविषये कर्मधारयाभाव उक्तः न सार्वत्रिकः ॥ अतएवान्यस्य पदस्यार्थे इत्यर्थकोन्यपदा
र्थेइति सूत्रनिर्देशः संगच्छते ॥ इदं तर्हि प्रयोजनं प्रधानेन तदंतविधिर्यथा स्यात् कुंभकारी अवयवादुत्पत्तिः प्राप्नोतीति भाष्यं तु ए
कदेश्युक्तिः । उक्तरीत्या सुबंतात्तद्धितोत्पत्त्या तदप्राप्तेः । अतएवानुपसर्जनादित्येष योगः प्रत्याख्यायतइति सर्वादीनीति सूत्रे भाष्य उक्तं ॥

३३

अत एवासमासे निष्कादिभ्य इति सूत्रस्थभाष्यसंगतिः। अन्यथा परमनिष्केण क्रीतमित्यर्थे निष्कशब्दात् प्रत्ययवारणाय समासग्रहणस्यावश्य
कत्वेन पूर्वोक्तदंताप्रतिषेधस्यार्थलापकता या असंगतिरित्याहुः॥ इतिमै वसेवेति। ननु परार्थाभिधानं वृत्तिरिति समर्थसूत्रस्थभाष्यविरोधः।
परपदार्थसंबंधस्वार्थोपस्थितिकरणं हि तस्यार्थः। यथा प्रत्ययो काार्थाभावो नास्ति तर्हि पदार्थसंबंधस्वार्थोपस्थितिस्वभावात् तत्करणं स्तरां
दुर्लभमिति विरोधः स्पष्ट एवेति चेन्न॥ विशिष्टस्य तत्कर० णलेन तद्घटकतया अर्थवदवयवस्य तद्योगीकारेणादोषात्॥ स्वोर्थिकत्त धिता
दौ वृत्तिलक्षणस्याभिचरितत्वाच्च॥ केचित्तु वृत्तिशब्दः प्रत्ययपर इत्याहुः॥ नन्वेवमपि गार्ग्यस्य परमे सापेक्षत्वेन सापेक्षमसमर्थवद्भवती
त्यनेन सविशेषणानां वृत्तिर्नेत्यनेन वा वृत्यभावप्रसंगः॥ नेचोपमितं मितिसूत्रे सामान्यप्रयोगग्रहणेन सापेक्षस्यापि प्रधानस्य वृत्तिबोध
नोन्न दोषः॥ भवति च गार्ग्यस्य परमार्थनिरूपितं प्राधान्यमिति वाच्यं॥ तेनाचिकीर्षितवृत्तिघटकप्रधानस्य सापेक्षत्वे वृत्तिबोधनेपि अन्य
त्रप्रधानस्य वृत्तिबोधने मानाभावात्॥ राज्ञः गोः गोक्षीरमित्यर्थे पूर्वसमाससाधनेन उत्तरसमासाभावबोधकसमर्थसूत्रभाष्येण तथैव
लाभात्॥ सापेक्षमसमर्थवदित्यस्य निर्विषयताप्रसंगाच्चेति चेन्न॥ तत्रैकोपस्थितिविषयत्वेन इतराकांक्षस्वरूपसापेक्षत्वाभावेनादोषा
त्॥ सविशेषणत्वमपि तथैव गृह्यत इति विवरण एव समाधानात्॥ ननु निष्कृष्य एकार्थीभावोभावेपि वृत्तिस्वीकारे अयथोत तथ्यं अयाथा
तथ्यं इत्यनयोः कदाचित्समुदायात् कदाचिदवयवात् प्रत्ययोत्पत्तौ लक्ष्यासंग्रहायथातथेति सूत्रवैयर्थ्यमिति चेन्न॥ तस्य भाष्ये प्रत्याख्या
नात्॥ नेच प्रत्याख्यानमपि गुरुतरयत्नसाध्यमेव कृतं। एतद्रीत्यंगीकारे मध्योदात्तत्वापत्तेः प्रत्ययांतरं तु ततो नभिधानान्नेति स्पष्टं कैय
टीये। भाष्यमपीति॥ एवोप्यर्थे भाष्यमपीत्यर्थः॥ अत एव तद्धितार्थेत्यनेन उत्तरपदे समासविधानं संगच्छते। अत एवानुपसर्जनादि
ति सूत्रे कुंभकारीशब्दैकदेशात् कारीशब्दात् ढगुत्पत्ति परं भाष्यं संगच्छते इत्याह॥ इसन्यत्रेति। प्रत्ययमात्रग्रहणेति। तत्फलं परशुराम
स्यापत्यं पारशुरामिरित्यत्र इत्रे सिद्धिः। यत्तु तत्फलं उगितश्चेत्यस्य प्राचीप्रथय। तीयादोषप्रवृत्तिरन्यथाय स्मादिहितस्तदादेरभावात्तत्र त
दनापत्तिरित्याहुस्तन्न॥ उगित्वदेश्य यापत्त्यप्रसंगकोटि रूपत्वेन उगिदंतादिति वाक्यभेदात् उगित्वदेन प्रत्ययग्रहणे एतदप्राप्त्या अदोषात्॥

उगितश्चेतिसूत्रेभाष्येध्वनितमेतत्॥ननुप्रतीषिषतीत्यत्राभ्यासांशस्यदीर्घवारणायोत्तरखंडेअप्रत्ययस्यशाब्दंद्विरोस्वरेउक्तत्वेनसन्त्वस्यप्रत्य
यीयाप्रत्ययसाधारण्येनसनार्थतात्रसत्रकथमस्याउपस्थितिरितिचेन्न॥अभ्यासोनर्थकःउत्तरखंडमेवार्थवत्।अतएवदयतेरितिसूत्रभा
ष्येअस्तेर्द्वित्वेपरस्यभूभावेपूर्वस्यश्रवणंप्राप्नोतिरित्याशंक्यआर्धधातुकइतिविषयस[...]मीत्वेनपरिहृतं।समुदायेअस्तित्वंतु
द्विःप्रयोगपक्षेदुरूपपोदंभिन्नानुपूर्विकत्वात्।इतितत्रनादिशेषस्थशाब्दंद्विरोस्वरोत्प्याउत्तरभागेतत्वप्रत्ययभित्तयाप्रत्ययत्वादिसत्वेनोदे
षात्।नचदयतेरितिसूत्रस्थंभाष्यंसागमेकदेशस्यवसाभ्यासस्यनिर्दिश्यमानत्वाभावेनोत्तरखंडस्यैवतत्वेनोपपन्नमितिवाच्यं।समुदायएव
तत्वमितिसिद्धांतमाश्रयतांपञ्जुगंतप्रकरणेवक्ष्यादित्तिप्रतिपादयतांमाधवादीनांमत्तावत्वंविभिः।स्वंरूपमितिशास्त्रातिरिक्तेसादिप
रिकुर्वद्भिःसमुदायेननिर्दिश्यमानत्वंसर्वस्यवक्तुमशक्यत्वात्।किंचउत्तरखंडेनिर्दिश्यमानत्वेप्यर्थवत्त्वाभावः।निर्दिश्यमानपरिभा
षयाअर्थवद्ग्रहणपरिभाषाबाधोनामआगमसमभिव्याहारेतद्रहितेअर्थवत्त्वमितिवदतांअर्थवतोनिर्दिश्यमानस्येत्यर्थस्वीकार[...]स्य
आवश्यकत्वात्॥अतएवसंपरिभ्यांइतिनेषापंचमीकातर्हितृतीयाव्यवहितश्चाप्युपसृष्टोभवतीति।स्कृट्कात्पूर्वइतिसूत्रस्थंभाष्यंसंग
च्छते॥नन्वेवंअससनेतिदीर्घोदुर्वारः॥नचदीर्घंबाधित्वापरत्वादतोलोपेउत्तरस्येटिरूपसिद्धिः॥पूर्वत्रगुणस्त्वन।नधातुलोपइतिनिषेधात्अ
तोलोपस्यस्थानिवत्वाच्चेतिवाच्यं॥ततोपिपरत्वेनसन्यतइत्यस्यैवपूर्वप्रवृत्तेः।नचादिस्येधित्स्यइत्यादोआर्धधातुकसामान्येनातोलो
पेकृतपूर्वाजंतादपियथास्यात्।इतिअजग्रहणमितिअचोयदितिसूत्रस्थभाष्येणकंडूयतेःक्विपिक्विप्लोपयलोपसंप्रधारणाप्र
तिपादनपरत्वेलोपोव्योरितिसूत्रभाष्यकैयटाभ्यांअतोलोपइतिसूत्रेआर्धधातुकेस्यस्यविषयसप्तमीत्वलाभेनपूर्वमतोलोपएवस्या
दितिवाच्यं।दीर्घेटस्थिभ्यांअल्लोपस्यविप्रतिषेधप्रतिपादनपरभाष्यप्रामाण्येनविषयसप्तमीत्वेफलाभावेनतेषामेकदेशयुक्तित्वात्॥
किंचप्रतीषिषाप्रतीषिषुरित्यादोआर्धधातुकविषयेअतोलोपेसनोद्वित्वानापत्तिः॥एवंइट्प्रतिपादनमप्यसंगतं।द्विःप्रयोगत्वा
द्वि[...]र्वचनस्यद्वितीयेकाचोविहितत्वानपायेनैकाजितिनिषेधेनेटोप्राप्तेः।नचशाबेकादेशस्यपरादित्वेनशपूर्वत्वात्अभ्यास

34

इकारस्य गुणापत्तिः ॥ एकादेशस्य स्थानिवत्त्वं तु न । अभ्यासकार्ये इति निषेधात् ॥ ममतु दीधीवेवीटामिति निषेधान्न दोष इति वाच्यं ॥ पुगंतसाहच
र्येणानभ्यासस्यैव लघूपधस्य ग्रहणात् । अत एव तिततउः इयन्नअउ प्रत्ययनिमित्तको लघूपधगुणो न । अत एवं अरिरिषतीत्य
त्रापि न गुण इति चेन्न ॥ हनादिसाहचर्येणार्धधातुकवदजंतांगस्यैव दीर्घविधानाददोष इति रत्नकृतैव समाधानात् । शेखरोक्त
समाधिस्तु न युक्तः । तथा सति प्रतीषिषुः प्रतीषिषा इत्यादौ उप्रत्यय अप्रत्यययोरनापत्तिः ॥ प्रतीषिषतीत्यत्रोत्तरखंडे षत्वा
नापत्तिश्च । न च पूर्वत्रासिद्धीयमद्विर्वचने इति पूर्वं षत्वे ततो द्वित्वेन च दोष इति वाच्यं । तेन षत्वस्यासिद्धत्वबोधनेऽपि निमित्ते
नप्रतिपदोक्तत्वेन च पूर्वं द्वित्वस्यैव प्रवृत्तेः । अत एव स्तौतिण्योरित्यत्र अभ्यासादिति सार्थकं ॥ ननु द्वित्वस्य पूर्वं प्रवृत्तो अभ्या
से षत्वानापत्तिः ॥ न च स्तौतिण्योरिति सूत्रे अभ्यासग्रहणस्या●धीषिषतीति फलमुपन्यस्य उक्तं ॥ ननु षणीत्युच्यते नेषा
परसप्तमी शंक्या विशातुं सन्यङः तं हि रुच्यते तस्मादेव षाः सप्तमी षणि सतीति स सप्तमी चेत्प्राप्नोतीति । समुदायस्य सन्
रूपत्वात् पौर्वापर्याभाव इति कैयटः । अनेन हि भाष्येण समुदाये सन्त्वलाभात् षत्वे सत्यप्रमिति वाच्यं । तद्भाष्यस्य स्थाने द्वि
र्वचनेऽभिप्रायकत्वेन एकदेशयुक्तित्वादिति चेन्न ॥ अभ्यासे चर्चेति चर्त्वेन प्रकृति चेरां प्रकृतिस्वर इति आदेशो आदेशान्यात्
षत्वसिद्धेः ॥ न चासिद्धं तत् । पूर्वत्रासिद्धीयमद्विर्वचने इत्यस्य द्वित्वाश्रयस्यैव कार्यान्तरे कर्तव्येऽपि असिद्धत्वनिषेधात् । अभ्यासजश्त्वं
चर्त्वं सिद्धमिति स्वरितो वेति सूत्रे भाष्ये सिद्धत्वबोधनात् च ॥ न चैवं तु किं तत् ॥ शर्पूर्वाः इति सूत्रे इचिच्छिषतीत्यत्र दर्शितयोर्भा
ष्ये प्रत्याख्यानात् ॥ अत एव तृफलेति सूत्रे फलिभजिग्रहणं चरितार्थं ॥ स्पष्टश्चायमर्थः । तएकेति सूत्रे दधस्तथोश्चेति सू
त्रे भाष्ये इत्याहुः । सन्यतः इति सूत्रस्थशब्देन्दुशेखरस्तु●प्राचामनुरोधेन । एतेन प्रत्ययमात्रग्रहणे इस्य प्रत्ययधातु
उभयसाधारणरूपग्रहणे इस्यापि न दोषः ॥ यद्वा सन्त्वस्योभयसाधारण्येऽपि । सनाद्यंता इत्यत्र प्रत्ययाधिकारस्थस्यैव ग्र

हणेनादोषः। वस्तुतः द्विर्वचनेसन्त्वप्रत्ययत्वादिसमुदायेएवनोत्तरखंडेइतिसन्त्वंप्रत्ययमात्रवृत्ति। अतएवस्रुविनिर्दुभ्यइतिसूत्रेकैयटेनवि
षुषुपतुरित्यत्रसमुदायस्यैवस्रुपित्वमुक्तं॥ दयतेरितिसूत्रस्थंभाष्यंतुसागमकस्यैवसाभ्यासस्यनिर्दिश्यमानत्वाभावेनोत्तरखंडस्यैवतत्त्वेनोपपन्नं॥
अतएवभ्रस्जोरितिसूत्रेभाष्येबरीभृज्जेतरस्यत्रीकोरेफस्यलत्वमाशंक्यउपदेशाद्दस्तनुद्धयासमाहितं अतएवउर्णुनुवतुरित्यत्रोवङ् अनुबस्येदरस्यत्रअनु
विपर्यभिनिभ्यइतिषत्वंधत्तरस्यतस्पत्तथोरितिषत्वभावः प्रतीषिषतीसनाभ्यासस्यदीर्घाभावश्चसिध्यति। स्थादिष्वितिसूत्रेनव्योस्रुनोसाधवय
वस्येवतत्संबंध्यवयवस्यापिषत्वार्थत्वं यद्वा तत्प्रकरणेतत्तधातोरिवततेदानुपूर्वीकस्यापिग्रहणमित्यादितुस्वरूपव्याक्ति [illegible] येवपरोकृतं प्र
तीषिषतीसत्रोत्तरखंडस्यतनादित्रोषोक्तधातुत्वमपिनस्यात्धात्वादित्वाभावात्। ननुउत्तरखंडस्यप्रत्ययत्वाभावेप्रतीषिषतीसत्रकथंसन्यतइतिइत्वमि
तिचेन्न॥ तत्रसनीयस्यनिमित्तसप्तमीत्वेनसन्निमित्ताभ्यासस्येत्यर्थेनादोषात्॥ प्रसाधसमभिहारेतुअसनेतिदीर्घेणईषि[illegible]षतीयेवसाधु॥ आ
टिटदिषत्रणिलोपेस्तृण्यंतांगस्यालइत्यर्थेनस्तृलभः। एवंचपूर्वेधातुः साधनेनेतिसिद्धांतेद्वित्वोत्तरंनेविशारसादीनांप्रवृत्तिः साधुसंगच्छतेइ
त्यपास्तं॥ भ्रस्जोरितिसूत्रस्थंभाष्यंतुएकदेशयुक्तिः॥ समुदायेधातुत्वांगीकारेपिअर्थवन्निर्दिश्यमानावयवस्यदुरूपादत्वात्॥ किंचपाष्ठंद्विर्वच
नेद्विःप्रयोगइतिसिद्धांतेनप्रत्येकंद्वयोस्तत्वबोधनेपिसमुदायेतत्कस्यनंसर्वथानिर्युक्तिकं। उर्णुनुवतुरित्यत्रापिनदोषः। विशिष्टधातोर्द्वि
त्वेसार्थकस्यनिरर्थकेस्यकत्स्येनं। अवयवद्वित्वेतुसएवायामितिप्रत्यभिज्ञारूपावादिप्रतिवादिनोःकृत्यनोतुल्यैव॥ अतएवाटिटदिषोदेणि
लोपासिद्धिः। ण्यंतांगस्यालइत्यर्थेनपरिहारस्तुनिर्दिश्यमानपरिभाषानवस्थानेन॥ किंचताद्दशार्थस्वीकारेपाटेर्णिलुकृचोकेदीर्घो
भ्यासस्येतिवचनसिद्धपाटूपेटइत्यस्यासत्लोपेअसंगयापत्तेः॥ अतएवधत्तरस्यत्रदधस्तथोरितिभष्भावइतितुमंदोपलंभनमात्रं।
द्विरुक्तस्वरूपस्यैवसूत्रेनुकरणात्॥ यद्वासन्नवस्यउभयेसाधारण्येपिसनाद्यंतात्रस्यत्रप्रत्ययाधिकारस्थस्यैवग्रहणेनादोषइतितु
स्वरूपव्याक्तियायेव॰ पराकृतं॥ प्रतीषिषतीयेत्रधातुसंतातः पूर्वेनिसत्वा। तुद्वित्वेलेशश्यनापत्तेः॥ अदादिप्रकरणेरोरवरेनेविशारदसा
देर्गतिरुक्तेव॥ प्रसाधसमभिव्याहारेअभ्यासस्यनैर[illegible]र्थक्येनअसनेतिदीर्घोप्रदेसाईषिषतीयेवसाध्वितिसुधियोविभावयंतु॥ ७॥
ग्रं॰ समाप्ता॥ ७॥ श्री॥

र

प